# पूर्णिमा

इतिहास-प्रधान त्रैमासिक पत्रिका

८१ पूर्णाङ्क

संशोधन-मण्डल

का.मे.अ.द.नं. १५५/२४९

*तदिह न गुणदोषौ योजनीयावलीकौ*
*कथमपि महता यत् संस्कृतोऽयं श्रमेण ।*

- बापूदेव शास्त्री

[ धेरै मिहिनेत गरी यो तयार गरिएको छ । यस कारण यहाँ झूटो गुण अथवा दोष नलाइदिनुहोला । ]

# पूर्णिमा

( इतिहास-प्रधान त्रैमासिक पत्रिका )

२१ वर्ष

१ अङ्क

सम्पादक-
महेशराज पन्त
दिनेशराज पन्त

प्रकाशक-
देवीप्रसाद भण्डारी
(संशोधन-मण्डलद्वारा)

यस अङ्कको मूल्य रु. ५०/-

# विषय-सूची


१. छोट्टयाइएको लघुकौमुदीको अलिकता भाग

- नयराज पन्त

सहायक - रामजी तेवारी १ - ६२

| | |
|---|---|
| प्रस्तावना | ३ - ६ |
| संज्ञाप्रकरणम् | ७ - ८ |
| अच्सन्धिप्रकरणम् | ८ - १० |
| हल्सन्धिप्रकरणम् | १० - १३ |
| विसर्गसन्धिप्रकरणम् | १३ - १४ |
| अजन्तपुंलिङ्गप्रकरणम् | १४ - ३१ |
| अजन्तस्त्रीलिङ्गप्रकरणम् | ३२ - ४१ |
| अजन्तनपुंसकलिङ्गप्रकरणम् | ४१ - ४६ |
| हलन्तपुंलिङ्गप्रकरणम् | ४७ - ६२ |

२. वि. सं. ६३३ देखि नेपालमा नयाँ संवत् चलेको थियो भन्ने कुराको एउटा थप प्रमाण

- महेशराज पन्त ६३ - ६९

३. ऐ. शि. बाबुराम आचार्यले रचना गर्नुभएको नेपालको संक्षिप्त इतिहास

- देवीप्रसाद भण्डारी ७० - ७९

# छोट्याइएको लघुकौमुदीको अलिकता भाग

छोट्याउने – नयराज पन्त

सहायक - रामजी तेवारी ( वि. सं. १९७३-२०४० )

# समर्पण

मेरो मनमा व्याकरणविषयको ज्ञान चढाइदिने

मेरा गुरु पण्डित बाबुराम पोखेल ( वि. सं. १९२९-१९८८ )को स्मृतिमा

यो ग्रन्थ सादर समर्पण गर्दछु ।

– *नयराज पन्त*

# प्रस्तावना

मेरा मामा मास्टर[1] मेरुनाथ पाँडे ( वि. सं. १९५८-२०३८ ) स्रेस्तापाठशालामा पढाउनुहुन्थ्यो । म स्रेस्तापाठशालामा पढ्थेँ । मामासँग स्रेस्तापाठशालामा र घरमा पनि मेरा मामा र मेरी आमाका फुफूका छोरा पं. कविराज पाँडे ( वि. सं. १९५८-१९९९ )ले मिली बनाएको *सरल बीजगणित* मैले पढेँ । त्यसपछि बापूदेव शास्त्री ( वि. सं. १८७८-१९४७ )ले बनाएको *बीजगणित*को पूर्वार्द्ध पनि मामासँग पढेँ । त्यस वेला अङ्ग्रेजी शिक्षाको दबदबाउँदो प्रभाव थियो । यस कारण मेरा मामाले आफ्ना साथी पं. तीर्थप्रसाद नेपालसँग भनी मलाई अङ्ग्रेजी पढाउन लाउनुभयो । गुरु तीर्थप्रसाद इन्ट्रेन्स परीक्षामा उत्तीर्ण हुनुभएको थियो । उहाँले मलाई ४ वर्ष जति अङ्ग्रेजी नि:शुल्क पढाइदिनुभयो । वि. सं. १९८४ को अन्त्यमा दरबारहाईस्कूलमा पाँचौँ कक्षामा मलाई भर्ना गराइदिने विचार पनि भयो । त्यस वेला मेरा मातामह राजदरबारमा श्री ५ त्रिभुवन ( वि. सं. १९६३-२०११ )का बडामहारानीहरूलाई पढाउनुहुन्थ्यो । दरबारमा श्री ५ त्रिभुवनलाई पढाउन सरदार प्रिन्सिपल बटु बाबु पनि आउँछन् , उनी मसँग बडो मिजासिलो व्यवहार गर्छन् , म उनीसँग भनी तँलाई दरबारहाईस्कूलमा भर्ना गराइदिन्छु भनी मातामहले मसँग भन्नु पनि भएको थियो ।

वि. सं. १९८४ को हिउँदमा घरमै मैले मामासँग बापूदेवको *बीजगणित*को पूर्वार्द्ध जम्मै जस्तो पढिसकेको थिएँ । यो *बीजगणित* पढेपछि संस्कृत बीजगणित पढ्न पनि सजिलो हुन्छ भनी मेरा मामाले भन्नुभयो । मेरो मनमा संस्कृत बीजगणित पढ्ने इच्छा भयो । संस्कृत बीजगणित पढ्दा ज्यौतिष पनि पढ्नुपर्ने भयो । ज्यौतिष पढ्छु भनी मैले मामासँग भनेँ । हाम्रो कुलविद्या ज्यौतिष हो, मैले ज्यौतिष पढिनँ, तँ पढ्ने भए पढ्

---

१. मेरा मामाले अङ्ग्रेजी पढ्नुभएको थिएन । परन्तु उहाँको सरकारिया पद मास्टर थियो । यो कुरो रमाइलो छ । श्री ३ चन्द्र ( वि. सं. १९२०-१९८६ )ले स्रेस्ता पास भएका मान्छेलाई मात्र अड्डाखानामा जागीर दिने प्रबन्ध वि. सं. १९६२ देखि चलाए । त्यस विषयको शिक्षा दिनका लागि स्रेस्तापाठशाला पनि उनले खडा गराए । त्यस विषयको प्रबन्ध मिलाउने गुरुज्यू हेमराज ( वि. सं. १९३५-२०१० ) थिए । त्यस वेला त्यहाँका अध्यापकहरूको सरकारिया पद पण्डित थियो । पछि वि. सं. १९७७ तिर स्रेस्तापाठशालामा नयाँ प्रबन्ध भयो । त्यस वेला त्यहाँ नियुक्त भएका एक जना देवीप्रसाद (?)ले चीफसाहेब भीमशमशेर ( वि. सं. १९२२-१९८९ )सँग सरकार ! इज्जत पाऔँ भनी बिन्ती गर्दा तिमीहरू मास्टर भयौ भनी भीमशमशेरले बोलिदिए । त्यसै कारणले त्यस वेलादेखि स्रेस्तापाठशालाका अध्यापक मास्टर कहलाउन थाले । यो कुरो मलाई मेरा मातामह पं. भुवननाथ पाँडे ( वि. सं. १९२०-२०००)ले भन्नुभएको हो । मेरा मातामह वि. सं. १९६२ देखि १९६७ सम्म स्रेस्तापाठशालामै अध्यापक हुनुहुन्थ्यो । उहाँको पद पण्डित नै थियो । मैले वि. सं. १९७९ देखि १९८४ सम्म स्रेस्तापाठशालामा पढेको हुँ । त्यस वेला त्यहाँ ४ जना अध्यापक हुनुहुन्थ्यो - गुरु दिव्यमान जोशी, गुरु जगत्मान प्रधान, गुरु ललितनरसिंह जोशी, गुरु मेरुनाथ पाँडे । यी चारै जनासँग मैले पढेको छु । यी चारै जना अङ्ग्रेजी जान्नुहुँदैनथ्यो । तर उहाँहरूको पद मास्टर थियो । तीन जना नेवार भएका र मेरा मामा बाहुन भएकाले मेरा मामालाई विद्यार्थीहरू बाहुन गुरु भन्थे । बाहुन विद्यार्थीहरू नेवार गुरुलाई स्वस्ति गर्थे, बाहुन गुरुलाई चाहिँ हातमा ढोग्थे । अरू जातका विद्यार्थीहरू नेवार गुरुलाई सलाम गर्थे, बाहुन गुरुलाई हातमा ढोग्थे ।

त भनी मामाले भन्नुभयो र रानीपोखरीसंस्कृतपाठशालामा ज्यौतिषका अध्यापक पं. हेमनाथ भट्टसँग कुरा मिलाइदिनुभयो । फाल्गुन महीना आउन लागेको थियो । म बटु बाबुसँग कुरा मिलाइदिन्छु भनी मातामहले भन्नुभयो । म अङ्ग्रेजी पढ्दिनँ, ज्यौतिष पढ्छु भनी मैले भनेँ । ज्यौतिष पढ्ने भए *कौमुदी* पढ्नुपर्छ भनी मातामहले भन्नुभयो । मैले *कौमुदी* पढ्छु भनेँ । रानीपोखरीपाठशालाका पण्डित बाबुराम पोखेल राम्रोसँग पढाउँछन् , उनीसँग गई पढ् , म भनिदिन्छु भनी मातामहले भन्नुभयो र राम्रो साइत हेरी पढ्नुपर्छ भनी एक दिन ( दिन मैले बिर्सें ) रातमा मलाई *लघुकौमुदी* प्रारम्भ गराइदिनुभयो ।[२] वि. सं. १९८४ को फाल्गुनमा रानीपोखरीसंस्कृतपाठशालामा गई गुरु पं. बाबुराम पोख्रेलसँग *लघुकौमुदी* पढ्न म लागेँ । उहाँ बडो राम्रो ढङ्गले पढाउनुहुन्थ्यो । मैले पनि मेहनतसाथ पढेँ । बाबुराम गुरु पहिले बडागुरुज्यू कुवलयराजको घर फसिकेवमा गुरुज्यूका छोराहरूलाई पढाउनुहुन्थ्यो । यो कुरा मैले उहाँकै मुखबाट सुनेको हुँ । डिट्ठा पद्मराज पाँडे बडागुरुज्यू कुवलयराजका आश्रित थिए । पद्मराजका जेठा छोरा रुद्रराज पाँडे ( पछि सरदार तथा त्रिभुवनविश्वविद्यालयका उपकुलपति )ले पनि बाबुराम गुरुसँग केही पढेकाले बाबुराम र रुद्रराजको गुरुचेलाको सम्बन्ध थियो ।

वि. सं. १९८५ मा बडागुरुज्यू तर्कराजका दुइटा नाति टेकराज र नयनराज बाबुराम गुरुसँग पढ्न हेडमास्टर रुद्रराजका साथ लागी पाठशालामा आए । गुरुले पनि राम्रोसँग पढाउनुभयो । तर्कराजको घर डिल्लीबजार गएर पनि गुरु पढाउनुहुन्थ्यो । उनीहरूलाई गुरुले पहिले *पञ्चतन्त्र*हरू पढाउनुभयो । त्यसपछि वि. सं. १९८६ वा १९८७ मा *लघुकौमुदी*को पढाइ पनि चल्यो । हामीहरूले त *लघुकौमुदी* एकोपक्रमसँग पढ्यौँ, तर गुरुले टेकराज, नयनराजहरूलाई *लघुकौमुदी* छोट्टचाई पढाउनुभयो । त्यो पढाइ मैले पनि देखेँ । त्यसै वेलादेखि छोट्टचाई पढाउने विषयको ज्ञान मलाई भयो ।

वि. सं. १९८४ को फाल्गुनदेखि वि. सं. १९८८ को वैशाखसम्म मैले बाबुराम गुरुसँग सम्पूर्ण *लघुकौमुदी* र *मध्यकौमुदी*को तद्धितप्रकरणसम्म पढेँ । वि. सं. १९८८ मा श्री ३ भीमले लाएको कोटिहोममा बाबुराम

---

२ मेरा मातामहलाई नौ सर्ग *माघ* पछि ८० वर्षको उमेरसम्म पनि कण्ठस्थ जस्तै थियो । तर उहाँले व्याकरण विशेष पढ्नुभएको थिएन । आफ्ना भिनाज्यू पं. डमरुवल्लभ पन्तसँग पाठशालामा वि. सं. १९३७ मा उहाँले नौ सर्ग *माघ* र *सिद्धान्तकौमुदी*को हल्सन्धिसम्म पढ्नुभएको थियो । वि. सं. १९३७ मा *सिद्धान्तकौमुदी*को पाठ चल्दै थियो, मेरो १७ वर्षको उमेर थियो, साथी अमितार्क पन्तहरूसँग मिली जगन्नाथ जाने इच्छा भयो, पिताजीको इच्छा पढोस् भन्ने नै थियो, भागी जगन्नाथतिर गएँ, यसैले पढाइ रोकियो, मूर्खतापूर्ण काम भयो, वि. सं. १९४३ को आषाढमा पिताजी विश्वनाथ पाँडे ( वि. सं. १८७९-१९४३ )को स्वर्गवास भएपछि पं. वाचस्पति पन्तकहाँ पढ्न गएको हुँ भनी मातामह भन्नुहुन्थ्यो । वि. सं. १९४३ मा पं. वाचस्पति पन्तसँग उनकै घरमा पढ्न मेरा मातामह जानुभयो । तिमी आफैँ घरमा *रघुवंश* र *लघुकौमुदी* पढ, बुझेको बुझिहाल्यौ, नबुझेको सोध्न दिनकादिन मकहाँ आऊ भनी वाचस्पतिले भने । यसै गरी पढ्दा *रघुवंश* ५ सर्ग र *लघुकौमुदी* सुबन्तसम्म पुगेको थियो । वि. सं. १९४३ को अन्त्यतिर श्री ३ वीर ( वि. सं. १९०९-१९५७ )को हुकूमले चाँदीको नेल ठोकिई आफ्नो घर पाल्पातिर वाचस्पति लखेटिए र सो पढाइ त्यसै रोकियो । यो कुरा मातामहले नै मलाई भन्नुभएको हो । विशेष व्याकरण नपढेको कुराले मेरा मातामहको मनमा ग्लानि थियो ।

गुरु जानुभएको थियो । कोटिहोमबाट फर्केको केही दिनपछि बाबुराम गुरु बिरामी हुनुभयो र त्यसै वर्ष आषाढमा उहाँको स्वर्गवास भयो । त्यसपछि व्याकरणको मेरो पढाइ त्यसै रह्यो ।

वि. सं. १९८५ को श्रावणमा मैले *लघुकौमुदी*को हरिशब्दसम्म पढेको थिएँ । श्रावणको जाँच दिन पं. मोदनाथ रेग्मीकहाँ गएँ । ए तिम्रा बाबु मेरा साथी हुन् , थाहा पायौ, तिम्रा बाबु पनि काशीमा पढ्थे, म पनि काशीमा पढ्थें, तिम्री जेठी [ सौताने ] आमा थिइन् , तिम्रा दाज्यू पनि थिए, तिम्री जेठी आमा काशीमै मरिन् , तिम्रा बाबु तिम्रा दाज्यूलाई बोकी बोकी पढ्न जान्थे भन्ने कुरा मोदनाथले पहिले सुनाई अनि परीक्षा गर्न थाल्नुभयो ।[३] उहाँले सोधेका जम्मै प्रश्नका उत्तर मैले दिएँ । अन्त्यमा अच्सन्धि: यहाँ स्तो: श्चुना श्चु: ८ । ४ । ४० किन लागेन भनी उहाँले प्रश्न गर्नुभयो । मैले उत्तर दिन सकिनँ । जाऊ, तिम्रा गुरुलाई सोध, तिमीले पढेकै रहेछौ भनी उहाँले भन्नुभयो । यो कुरा मैले बाबुराम गुरुलाई सोधेँ । बाबुराम गुरुले अलि बढ्ता पढ, अनि बुझ्छौ भन्नुभयो ।

वि. सं. १९९७ मा म रानीपोखरीसंस्कृतपाठशालामा ज्यौतिष पढाउन नियुक्त भएँ । त्यसको केही वर्षपछि गुरु पं. टेकनाथ पौडेल ( वि. सं. १९३८-२००७ ) र मेरो पढाउने कोठा एउटै पर्‍यो । उहाँसँग मैले *काशिका* पढेँ । उहाँ विचारशील व्यक्ति हुनुहुन्थ्यो । उहाँ केही कुरा सोध्यो भने उत्तर दिनुहुन्थ्यो अथवा चूप लागेर बस्नुहुन्थ्यो, दुइ चार दिनपछि तिमीले सोधेका कुराको उत्तर फलानो ठाउँमा लेखेको रहेछ भनेर पनि भन्नुहुन्थ्यो ।[४]

वि. सं. १९९८ मा मेरा मातृष्वसेय [ सानीआमाका छोरा ] रामजी तेवारीलाई पढाउन भनी यो संक्षिप्त*लघुकौमुदी* मैले तयार पारेको हुँ । यसको खेस्रा तथा साफी दुवै रामजीको हातबाट भएको हो । व्याकरणविषयको शास्त्रीय ज्ञानमा प्रवेश गराउनुभन्दा संस्कृतभाषाको लौकिक ज्ञानमा प्रवेश गराउन यो पुस्तक तयार पारिएको हुनाले शास्त्रीय ज्ञानका लागि आवश्यक पर्ने स्थानिवदादेशोऽनल्विधौ १ । १ । ५६ जस्ता सूत्र यहाँ छोडिएका पनि छन् ।

---

३. मेरा बा [ पं. कृष्णदत्त पन्त ]ले पढ्नुभएका पुराना छापाका *मनोरमा, लघुशब्देन्दुशेखर* मेरो कोठामा छन् । तर ती पुस्तक मैले पढेको छैन । मेरा बाको व्याकरणविषयको ज्ञान कति थियो, यो पनि मलाई थाहा छैन । तपाईंका बासँग हामीले पढेका हौं भन्ने केही पण्डित मैले देखेको छु । तिनमा पं. देवीदत्त दवाडी [ पूर्णप्रसाद ब्राह्मणका बाबु ], पं. रविनाथ आचार्य, पं. रामहरि अर्ज्यालहरू पर्छन् ।

४. यस विषयका केही कुरा वि. सं. २०१९ मा ललितपुरबाट जगदम्बाप्रकाशनद्वारा प्रकाशित; धनवज्र वज्राचार्य, रामजी तेवारी, देवीप्रसाद भण्डारी, भोलानाथ पौडेल, शङ्करमान राजवंशी, गौतमवज्र वज्राचार्य, महेशराज पन्त र नयनाथ पौडेलको *इतिहास-संशोधनको प्रमाण-प्रमेय*मा छापिएको मेरो *उपोद्घात*मा र वि. सं. २०२९ मा प्रकाशित *पूर्णिमा* २८ अङ्कमा छापिएको *विद्वत्पूजा ( २ सङ्ख्या )* र वि. सं. २०३० मा प्रकाशित *पूर्णिमा* ३० अङ्कमा छापिएको *श्रीमान् यदुनाथ खनालज्यूले आफ्नो विद्वत्ता देखाउने समय आएको छ* भन्ने मेरा निबन्धमा पनि परेका छन् ।

अहिले यो ग्रन्थ बनाएको ५० वर्ष भइसक्यो । म पनि ७८ वर्ष पूरा भइसकें । रामजीको स्वर्गवास भएको पनि ८ वर्ष भइसक्यो । मेरा गुरुहरू पनि यस संसारमा अहिले हुनुहुन्न । यस अवस्थामा पूरा तयार हुन नसकेको यो ग्रन्थ प्रकाश नगरी चूप लागेर बसिरहैं भने यो पुस्तक कालान्तरमा गल्लीमा फ्याँकिएको कसिङ्गर बन्न पनि बेर छैन । यसै कारण केही संशोधन गरी यस ग्रन्थलाई अहिले प्रकाशन गराउने साहस गरेको हुँ ।

संस्कृतशिक्षा कसरी लौकिक बनाउने भन्ने कुरा मेरो मनमा खेलिरहन्छ । यही धारणाबाट यो पुस्तक पनि बनेको हो । वि. सं. १९९८ मा *लघुकौमुदी* छोट्ट्याउँदा बनाइएका तलका १० वटा पद्यले मेरो मनको भाव स्पष्टसँग प्रकट गर्छन्–

चेत् त्वं संस्कृतवाण्यैव विद्यां पठितुमिच्छसि ।
प्रयोगान् व्याकृतौ सिद्धान् सम्यग् विज्ञातुमर्हसि ॥ १ ॥
अनेन शास्त्रमार्गेण गच्छेस् त्वं यदि वाङ्मयम् ।
पूर्वजानां तव मनः संस्कुर्वीत शनैः शनैः ॥ २ ॥
दीर्घेण तपसा सिद्धे वाङ्मये मुनिसम्भवे ।
शिक्षितम्मन्यमूर्खाणां प्रहारैः परितः क्षते ॥ ३ ॥
द्वित्राणां पुस्तकानां हि गन्धमाघ्राय दूरतः ।
व्यासासनम् अलङ्कर्तुम् उत्सुके बहुले जने ॥ ४ ॥
यथाकथञ्चिद् यत् किञ्चिद् उक्त्वा स्त्रीजनसन्निधौ ।
कृतार्थमानितां याते लब्धवर्णे पुरोहिते ॥ ५ ॥
विद्याविमुखतां याते विद्याजीविनि मण्डले ।
परकीयानुकृत्यैव कृतार्थे च प्रतिष्ठिते ॥ ६ ॥
अस्माकं सकला विद्या परलोकप्रयोजना ।
क्षणिके बत संसारे कथं स्याच् शास्त्रयोजना ॥ ७ ॥
इत्यैकदेशभावेन व्याकुले बहुले जने ।
प्रत्यहं क्षीयमाणासु विद्यासु च समन्ततः ॥ ८ ॥
चेत् त्वं निजं पूर्वरूपं विज्ञातुं मित्र वाञ्छसि ।
तदाऽर्हसि प्रयत्नेन पठितुं सुरभारतीम् ॥ ९ ॥
गीर्वाणवाणीप्रासादद्वारीभूता प्रयत्नतः ।
संक्षिप्ता कौमुदी चेयं जायतां प्रीतये तव ॥ १० ॥

वि. सं. २०४८ । ६ । २६ । ७

– नयराज पन्त

# अथ संज्ञाप्रकरणम्

नत्वा सरस्वतीं देवीं यत्नतः संक्षिपाम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥

अइउण् १ । ऋलृक् २ । एओङ् ३ । ऐऔच् ४ । हयवरट् ५ । लण् ६ । ञमङणनम् ७ । झभञ् ८ । घढधष् ९ । जबगडदश् १० । खफछठथचटतव् ११ । कपय् १२ । शषसर् १३ । हल् १४ ।

इति माहेश्वराणि चतुर्दश सूत्राण्यणादिसंज्ञार्थानि । हयवरट्(५)इत्यादिदशसूत्रस्थेषु हकारादिष्वकार उच्चारणार्थः ।

## हल[1]न्त्यम्[1] १ । ३ । ३

उपदेशेऽन्त्यं हल् इत्संज्ञं स्यात् ।
उपदेश आद्योच्चारणम् ।

## आदिर[1]न्त्येन[3] सहे[4]ता[3] १ । १ । ७१

अन्त्येनेत्संज्ञकेन सहित आदिर् मध्यगानाम् आदेश् च संज्ञा स्यात् ।
यथाऽण् इति अ इ उ वर्णानां संज्ञा । एवम् अच् हल् अल् इत्यादयः ।

## ऊकालो[1]ऽज्[1]ह्रस्वदीर्घप्लुतः[1] १ । २ । २७

एकमात्रिककालोऽज् ह्रस्वसंज्ञः स्यात् । द्विमात्रिककालोऽज् दीर्घसंज्ञः स्यात् । त्रिमात्रिककालोऽच् प्लुतसंज्ञः स्यात् ।

## मुखनासिकावचनो[1]ऽनुनासिकः[1] १ । १ । ८

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ।
तद्भिन्नोऽननुनासिकसंज्ञः स्यात् ।

वर्णचक्रन्यासः

| | ह्रस्वाः | | दीर्घाः | | प्लुताः | |
|---|---|---|---|---|---|---|
| वर्णाः | अननुनासिकाः | अनुनासिकाः | अननुनासिकाः | अनुनासिकाः | अननुनासिकाः | अनुनासिकाः |
| अ | अ | अँ | आ | आँ | आ३ | आँ३ |
| इ | इ | इँ | ई | ईँ | ई३ | ईँ३ |
| उ | उ | उँ | ऊ | ऊँ | ऊ३ | ऊँ३ |
| ऋ | ऋ | ऋँ | ॠ | ॠँ | ॠ३ | ॠँ३ |
| लृ | लृ | लृँ | लृवर्णस्य दीर्घो न भवति | | लृ३ | लृँ३ |
| ए | एचां ह्रस्वो न भवति | | ए | एँ | ए३ | एँ३ |
| ऐ | | | ऐ | ऐँ | ऐ३ | ऐँ३ |
| ओ | | | ओ | ओँ | ओ३ | ओँ३ |
| औ | | | औ | औँ | औ३ | औँ३ |

तद् इत्थम् । अ इ उ ऋ एषां वर्णानां प्रत्येकं षड् भेदाः । लृवर्णस्य चत्वारो भेदास् तस्य दीर्घाभावात् । एचाम् अपि चत्वारस् तेषां ह्रस्वाभावात् ।

अचः स्वराः । कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शल ऊष्माणः । अं अः इत्यचः परावनुस्वार-विसर्गौ ।

| | | | |
|---|---|---|---|
| कु = क ख ग घ ङ | स्पर्शाः | हलः | |
| चु = च छ ज झ ञ | | | |
| टु = ट ठ ड ढ ण | | | |
| तु = त थ द ध न | | | |
| पु = प फ ब भ म | | | |
| यणः = य र ल व | अन्तःस्था: | | |
| शलः = श ष स ह | ऊष्माणः | | |
| अचः = अ इ उ ऋ लृ ए ऐ ओ औ | | | स्वराः |

अथ स्थानानि । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उप्वोर् ओष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठौष्ठम् । वकारस्य दन्तौष्ठम् । नासिकाऽनुस्वारस्य ।

यत्नो द्विधा । आभ्यन्तरो बाहचश् च । आद्यश् चतुर्धा । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टम् अन्तःस्थानाम् । ईषद्विवृतम् ऊष्मणाम् । विवृतं स्वराणाम् ।

बाहचस् त्वष्टधा । विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राणश् चेति । खरो विवाराः श्वासा अघोषाश् च । हशः संवारा नादा घोषाश् च । वर्गाणां प्रथमतृतीयपञ्चमा यणश् चाऽल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश् च महाप्राणाः ।

तुल्यास्यप्रयत्नं[1] सवर्णम्[1] १।१।९

ययोर् वर्णयोः स्थानम् आभ्यन्तरप्रयत्नश् च तुल्यं स्यात् तयोः सावर्ण्यं स्यात् ।

सुप्तिङन्तं[1] पदम्[1] १।४।१४

सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।

इति संज्ञाप्रकरणम्

---

## अथाऽच्सन्धिप्रकरणम्

इको[6] यण्[1]चि[7] ६।१।७७

इकः स्थाने यण् स्याद् अचि ।

सुधी उपास्य इति स्थिते

स्थाने[7]ऽन्तरतमः[1] १।१।५०

प्रसङ्गे सति सदृशतम आदेशः स्यात् ।

सुधी + उपास्यः = सुध्य् + उपास्यः = सुध्युपास्यः ।

मधु + अरिः = मध्व् + अरिः = मध्वरिः ।
धातृ + अंशः = धात्र् + अंशः = धात्रंशः ।
लृ + आकृतिः = ल् + आकृतिः = लाकृतिः ।

## एचो[६]Sयवायावः[१] ६।१।७८

एचः स्थाने अय् अव् आय् आव् एते स्युर् अचि ।
हरे ए इति स्थिते

## यथासङ्ख्यम[०]नुदेशः[१] समानाम्[६] १।३।१०

समसम्बन्धी विधिर् यथासङ्ख्यं स्यात् ।
हरे + ए = हर् + अय् + ए = हरये । विष्णो + ए = विष्ण् + अव् + ए = विष्णवे ।
नै + अकः = न् + आय् + अकः = नायकः । पौ + अकः = प् + आव् + अकः = पावकः ।

## अदे[१]ङ्[१] गुणः[१] १।१।२

अकार एङ् च गुणसंज्ञः स्यात् ।

## आद्[५] गुणः[१] ६।१।८७

अवर्णाद् अचि परे पूर्वपरयोर् एको गुणादेशः स्यात् ।
उप + इन्द्रः = उप् + एन्द्रः = उपेन्द्रः । गङ्गा + उदकम् = गङ्ग् + ओदकम् = गङ्गोदकम् ।

## उर[६]ण्[१] रपरः[१] १।१।५१

ऋस्थाने प्रयुज्यमानोSण् रपरो भवति ।
कृष्ण + ऋद्धिः = कृष्ण् + अर्द्धिः = कृष्णर्द्धिः ।

## वृद्धिरा[१]दै[१]च्[१] १।१।१

आकार ऐच् च वृद्धिसंज्ञः स्यात् ।

## वृद्धिरे[१]चि[७] ६।१।८८

अवर्णाद् एचि परे वृद्धिर् एकादेशः स्यात् ।
कृष्ण + एकत्वम् = कृष्ण् + ऐकत्वम् = कृष्णैकत्वम् । गङ्गा + ओघः = गङ्ग् + औघः = गङ्गौघः ।
देव + ऐश्वर्यम् = देव् + ऐश्वर्यम् = देवैश्वर्यम् ।
कृष्ण + औत्कण्ठचम् = कृष्ण् + औत्कण्ठचम् = कृष्णौत्कण्ठचम् ।

## अकः[५] सवर्णे[७] दीर्घः[१] ६।१।१०१

अकः सवर्णेSचि परे पूर्वपरयोर् दीर्घ एकादेशः स्यात् ।
दैत्य + अरिः = दैत्य् + आरिः = दैत्यारिः । श्री + ईशः = श्र् + ईशः = श्रीशः ।
विष्णु + उदयः = विष्ण् + ऊदयः = विष्णूदयः । होतृ + ऋकारः = होत् + ॠकारः = होतॄकारः ।

हरे + इह = हर् + अय् + इह = हरयिह ।

### लोपः[१] शाकल्यस्य[६] ८।३।१९

अवर्णपूर्वयोः पदान्तयोर् यवयोर् लोपो वाऽशि परे ।

हरयिह वा हर इह ।

### पूर्वत्रा[६]ऽसिद्धम्[१] ८।२।१

सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्याम् अपि पूर्वं प्रति परं शास्त्रम् असिद्धम् ।

तेन हर + इह इत्यत्र न गुणः ।

विष्णो + इह = विष्ण् + अव् + इह = विष्णविह वा विष्ण इह ।

### एङः[५] पदान्ताद[५]ति[७] ६।१।१०९

पदान्ताद् एङोऽकारे परे पूर्वरूपम् एकादेशः स्यात् ।

हरे + अव = हरेऽव । विष्णो + अव = विष्णोऽव ।

### ईदूदेद्द्विवचनं[१] प्रगृह्यम्[१] १।१।११

ईकार ऊकार एकार इत्यन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् ।

### प्लुतप्रगृह्या[१] अचि[७] ६।१।१२५

प्लुताश् च प्रगृह्याश् चाऽचि प्रकृत्या स्युः ।

हरी एतौ । विष्णू इमौ । गङ्गे अमू ।

### अदसो[६] मात्[५] १।१।१२

अदस्शब्दस्य मकारात् परौ ईकार ऊकार इत्यन्तौ प्रगृह्यौ स्तः ।

अमी ईशाः । रामकृष्णावमू आसाते ।

इत्यच्सन्धिप्रकरणम्

---

## अथ हल्सन्धिप्रकरणम्

### स्तोः[६] श्चुना[३] श्चुः[१] ८।४।४०

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः ।

रामस् + शेते = रामश् शेते । रामस् + चिनोति = रामश् चिनोति ।

सत् + चित् = सच् चित् । शार्ङ्गिन् + जय = शार्ङ्गिञ् जय ।

### ष्टुना[३] ष्टुः[१] ८।४।४१

सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः ।

रामस् + षष्ठः = रामष् षष्ठः । रामस् + टीकते = रामष् टीकते ।

पेष् + ता = पेष्टा । तत् + टीका = तट्टीका । चक्रिन् + ढौकसे = चक्रिण् ढौकसे ।

### न[१] पदान्ताद्[५] टोर[५]नाम्[६] ८ । ४ । ४२

पदान्ताट् टवर्गात् परयो: सकारतवर्गयो: षकारटवर्गौ न स्याताम् , नाम् इत्येतद् वर्जयित्वा ।
षट् सन्त: । षट् ते ।

### झलां[६] जशो[१]ऽन्ते[७] ८ । २ । ३९

पदान्ते झलां जश: स्यु: ।
वाक् + ईश: = वागीश: ।

### यरो[६]ऽनुनासिके[७]ऽनुनासिको[१] वा[१] ८ । ४ । ४५

यर: पदान्तस्याऽनुनासिके परेऽनुनासिको वा स्यात् ।
एतद् + मुरारि: = एतन् मुरारि: वा एतद् मुरारि: ।
अत्र प्रायोऽनुनासिकप्रयोगस्यैव व्यवहार: ।

### तो[६]र्लि[७] ८ । ४ । ६०

तवर्गस्य लकारे परे परसवर्ण: ।
तद् + लय: = तल्लय: । विद्वान् + लिखति = विद्वाल्ँ लिखति ।

### खरि[७] च[१] ८ । ४ । ५५

खरि झलां चर: स्यु: ।
वाग् + कलह: = वाक्कलह: ।

### झयो[५] हो[६]ऽन्यतरस्याम्[१] ८ । ४ । ६२

झय: परस्य हस्य वा पूर्वसवर्ण: स्यात् ।
नादस्य घोषस्य संवारस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थ: ।
वाग् + हरि: = वाग्घरि: वा वाग्हरि: ।

### श[६]श्छो[१]ऽटि[७] ८ । ४ । ६३

झय: परस्य शस्य छो वाऽऽटि ।
तद् + शिव: = तच्छिव: वा तच्शिव: ।

### मो[६]ऽनुस्वार:[१] ८ । ३ । २३

पदान्तस्य मस्याऽनुस्वारो हलि ।
हरिम् + वन्दे = हरिं वन्दे ।

### न[६]श्चा[१]ऽपदान्तस्य[६] झलि[७] ८ । ३ । २४

नस्य मस्य चाऽपदान्तस्य झल्यनुस्वार: ।
यशान् + सि = यशांसि । आक्रम् + स्यते = आक्रंस्यते ।

अनुस्वारस्य[६] ययि[७] परसवर्णः[१] ८ । ४ । ५८

शाम् + तः = शां + तः = शान्तः ।

वा[६] पदान्तस्य[६] ८ । ४ । ५९

पदान्तस्याऽनुस्वारस्य ययि परे परसवर्णो वा स्यात् ।

त्वम् + करोषि = त्वं करोषि वा त्वङ् करोषि ।

ङमो[५] ह्रस्वाद[५]चि[७] ङमुण्[१] नित्यम्[१] ८ । ३ । ३२

ह्रस्वात् परो यो ङम् तदन्तं यत् पदं तस्मात् परस्याऽचो नित्यं ङमुट् ।

उपदेशे[७]ऽज[१]नुनासिक[१] इत्[१] १ । ३ । २

उपदेशेऽनुनासिकोऽज् इत्संज्ञः स्यात् ।

तस्य[६] लोपः[१] १ । ३ । ९

इत्संज्ञकस्य लोपः स्यात् ।

आद्यन्तौ[१] टकितौ[१] १ । १ । ४६

टित्कितौ यस्योक्तौ तस्य क्रमाद् आद्यन्तावयवौ स्तः ।

टिद् आदिर् भवति किद् अन्तो भवति ।

प्रत्यङ् + आत्मा = प्रत्यङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा ।

सुगण् + ईशः = सुगण् + ण् + ईशः = सुगण्णीशः ।

सन् + अच्युतः = सन् + न् + अच्युतः = सन्नच्युतः ।

न[६]श्छव्य[७]प्रशान्[६] ८ । ३ । ७

अम्परे छवि नान्तस्य पदस्य रुः ।

चक्रिन् + त्रायस्व = चक्रिरु + त्रायस्व

अत्रा[६]ऽनुनासिकः[१] पूर्वस्य[६] तु[६] वा[६] ८ । ३ । २

अत्र रुप्रकरणे रोः पूर्वस्याऽनुनासिकः स्यात् ।

चक्रिँरु + त्रायस्व = चक्रिँर् + त्रायस्व

खरवसानयो[७]र्विसर्जनीयः[१] ८ । ३ । १५

खर्यवसाने च पदान्तस्य रस्य विसर्गः ।

= चक्रिँः + त्रायस्व

विसर्जनीयस्य[६] सः[१] ८ । ३ । ३४

विसर्गस्य सः स्यात् खरि परे ।

= चक्रिँस् त्रायस्व ।

### कुप्वो[७]≍ क≍ पौ[१] च‘ ८ । ३ । ३७

कखयो: पफयोश् च परयोर् विसर्गस्य विसर्गो भवति ।
राम: करोति । राम: खनति ।
वृक्ष: पचति । वृक्ष: फलति ।

### छे[७] च‘ ६ । १ । ७३

ह्रस्वस्य छे तुक् ।
शिव + छाया = शिव + त् + छाया = शिवच्छाया ।

इति हल्सन्धिप्रकरणम्

---

## अथ विसर्गसन्धिप्रकरणम्

### वा‘ शरि[७] ८ । ३ । ३६

शरि विसर्गस्य विसर्गो वा ।
हरि: शेते वा हरिश् शेते ।

### ससजुषो[६] रु:[१] ८ । २ । ६६

पदान्तस्य सस्य रु: स्यात् ।
शिवस् + अर्च्य: = शिवरु + अर्च्य:

### अतो[५] रोर[६]प्लुताद[५]प्लुते[७] ६ । १ । ११३

अकारात् परस्य रोर् उ: स्याद् अकारे परे ।
= शिवउ + अर्च्य: = शिवो + अर्च्य: = शिवोऽर्च्य: ।

### हशि[७] च‘ ६ । १ । ११४

अकारात् परस्य रोर् उ: स्याद् धशि परे ।
शिवस् + वन्द्य: = शिवरु + वन्द्य: = शिवउ + वन्द्य: = शिवो वन्द्य: ।

### भोभगोअघोअपूर्वस्य[६] यो[१]ऽशि[७] ८ । ३ । १७

अवर्णपूर्वस्य रोर् यकारादेशोऽशि परे ।
देवस् + इह = देवरु + इह = देवय् + इह = देवयिह वा देव इह ।
देवास् + इह = देवारु + इह = देवाय् + इह = देवायिह वा देवा इह ।
देवास् + गच्छन्ति = देवारु + गच्छन्ति = देवाय् + गच्छन्ति

### हलि[७] सर्वेषाम्[६] ८ । ३ । २२

अवर्णपूर्वस्य पदान्तस्य यकारस्य लोप: स्याद् धलि परे ।
= देवा गच्छन्ति ।

रो[६] रि[७] ८।३।१४

रस्य रे परे लोपः ।
पुनर् + रमते = पुन + रमते

ढ्रलोपे[७] पूर्वस्य[६] दीर्घो[१]ऽणः[६] ६।३।१११

ढरयोर् लोपनिमित्तयोः पूर्वस्याऽणो दीर्घः ।
= पुना रमते ।
हरिस् + रम्यः = हरिरु + रम्यः = हरिर् + रम्यः = हरि + रम्यः = हरी रम्यः ।
शम्भुस् + राजते = शम्भुरु + राजते = शम्भुर् + राजते = शम्भु + राजते = शम्भू राजते ।

एतत्तदोः[६] सुलोपो[१]ऽकोर[६]नञ्समासे[७] हलि[७] ६।१।१३२

एतत्तदोर् यः सुस् तस्य लोपो हलि ।
एषस् + विष्णुः = एष विष्णुः । सस् + शम्भुः = स शम्भुः ।

इति विसर्गसन्धिप्रकरणम्

---

# अथाऽजन्तपुंलिङ्गप्रकरणम्

## अथाऽकारान्तपुंलिङ्गशब्दाः

अर्थवद[१]धातुर[१]प्रत्ययः[१] प्रातिपदिकम्[१] १।२।४५

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ।

कृत्तद्धितसमासा[१]श्च[६] १।२।४६

कृत्तद्धितान्तौ समासाश् च प्रातिपदिकसंज्ञाः स्युः ।

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्[१] ४।१।२

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| सु | औ | जस् | प्रथमा |
| अम् | औट् | शस् | द्वितीया |
| टा | भ्याम् | भिस् | तृतीया |
| ङे | भ्याम् | भ्यस् | चतुर्थी |
| ङसि | भ्याम् | भ्यस् | पञ्चमी |
| ङस् | ओस् | आम् | षष्ठी |
| ङि | ओस् | सुप् | सप्तमी |

## रामः

### ङ्याप्प्रातिपदिकात्[५] ४ । १ । १

प्रातिपदिकात् परे स्वादयः प्रत्ययाः स्युः ।
राम + सु = राम + स् = राम + रु = राम + र् = रामः । राम + औ = रामौ ।

### चुटू[१] १ । ३ । ७

प्रत्ययाद्यौ चवर्गटवर्गावित्संज्ञौ स्तः ।
इति जसो जकारस्येत्वम् ।

### विभक्ति[१]श्च[६] १ । ४ । १०४

सुप्तिङौ विभक्तिसंज्ञौ स्तः ।

### न[६] विभक्तौ[७] तुस्माः[१] १ । ३ । ४

विभक्तिस्थास् तवर्ग-स-मा नेत्संज्ञाः ।
इति सस्य नेत्वम् ।

### प्रथमयोः[७] पूर्वसवर्णः[१] ६ । १ । १०२

अकः प्रथमाद्वितीययोर् अचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् ।
अवर्णाद् द्विवचने परे पूर्वसवर्णदीर्घो न भवति । दीर्घात् तु द्विवचने जसि च परे पूर्वसवर्णदीर्घो न भवति ।
राम + जस् = राम + अस् = रामास् = रामारु = रामार् = रामाः ।

### अमि[७] पूर्वः[१] ६ । १ । १०७

अकोऽम्यचि पूर्वरूपम् एकादेशः ।
राम + अम् = रामम् ।
राम + औट् = राम + औ = रामौ ।

### लशक्व[१]तद्धिते[७] १ । ३ । ८

तद्धितवर्जप्रत्ययाद्या लशकवर्गा इत्संज्ञाः स्युः ।
इति शसः शकारस्येत्वम् ।

### तस्मा[५]च्छसो[६] नः[१] पुंसि[७] ६ । १ । १०३

पूर्वसवर्णदीर्घात् परो यः शसः सस् तस्य नः स्यात् पुंसि ।
राम + शस् = राम + अस् = रामास् = रामान् ।

### टाङसिङसामि[६]नाऽत्स्याः[१] ७ । १ । १२

अकारान्तात् परेषां टा ङसि ङस् इत्येषाम् यथासङ्ख्यम् इन आत् स्य इत्यादेशाः स्युः ।

अट्कुप्वाङ्नुम्व्यवाये[७]ऽपि[१] ८ । ४ । २

ऋवर्णरिफषकारेभ्य: परस्य नस्य णत्वं भवति समानपदे । अट् कवर्ग: पवर्ग आङ् नुम् एतैर् व्यवधानेऽपि णत्वं भवति, पदान्तस्य नस्य तु णत्वं न भवति ।

राम + टा = राम + इन = रामेन = रामेण ।

सुपि[७] च[१] ७ । ३ । १०२

यञादौ सुप्यकारस्य दीर्घो भवति ।

राम + भ्याम् = रामाभ्याम् ।

अतो[५] भिस[६] ऐस्[१] ७ । १ । ९

अकारान्तात् परस्य भिस ऐस् स्यात् ।

राम + भिस् = राम + ऐस् = रामैस् = रामैरु = रामैर् = रामै: ।

ङे[६]र्य:[१] ७ । १ । १३

अकारान्तात् परस्य ङेर् यकारादेश: ।

राम + ङे = राम + य = रामाय ।

रामाभ्याम् ।

बहुवचने[७] झल्ये[७]त्[१] ७ । ३ । १०३

झलादौ बहुवचने सुप्यकारस्य एकार: ।

राम + भ्यस् = रामे + भ्यस् = रामेभ्यरु = रामेभ्यर् = रामेभ्य: ।

राम + ङसि = राम + आत् = रामात्

वा[१]ऽवसाने[७] ८ । ४ । ५६

अवसाने झलां चरो वा स्यु: ।

रामात् वा रामाद् ।

रामाभ्याम् । रामेभ्य: । राम + ङस् = रामस्य ।

ओसि[७] च[१] ७ । ३ । १०४

अकारस्य एकार: स्याद् ओसि परे ।

राम + ओस् = रामे + ओस् = राम् + अय् + ओस् = रामयोस् = रामयोरु = रामयोर् = रामयो: ।

ह्रस्वनद्यापो[५] नुट्[१] ७ । १ । ५४

ह्रस्वान्तान् नद्यन्ताद् आबन्ताच् च परस्याऽमो नुडागम: ।

नामि[७] ६ । ४ । ३

अजन्तानां दीर्घो नामि परे ।

राम + आम् = राम + न् + आम् = राम + नाम् = रामा + नाम् = रामाणाम् ।

राम + ङि = राम + इ = रामे । रामयोः ।
राम + सुप् = राम + सु = रामे + सु

## आदेशप्रत्यययोः[७] ८ । ३ । ५९

इण्कवर्गाभ्यां परस्याऽपदान्तस्याऽदेशस्य प्रत्ययावयवस्य च यः सस् तस्य मूर्धन्यादेशः ।
ईषद्विवृतस्य सस्य तादृश एव षः ।
= रामेषु ।

## एङ्ह्रस्वात्[५] सम्बुद्धेः[६] ६ । १ । ६९

एङन्ताद् ध्रस्वान्ताच् च परं यत् सम्बोधनैकवचनसम्बन्धि हल् तस्य लोपो भवेत् ।
हे राम + सु = हे राम + स् = हे राम ।
हे रामौ । हे रामाः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **रामः** | **रामौ** | **रामाः** | प्रथमा |
| **रामम्** | **रामौ** | **रामान्** | द्वितीया |
| **रामेण** | **रामाभ्याम्** | **रामैः** | तृतीया |
| **रामाय** | **रामाभ्याम्** | **रामेभ्यः** | चतुर्थी |
| **रामात्, रामाद्** | **रामाभ्याम्** | **रामेभ्यः** | पञ्चमी |
| **रामस्य** | रामयोः | **रामाणाम्** | षष्ठी |
| **रामे** | रामयोः | **रामेषु** | सप्तमी |
| **हे राम** | **हे रामौ** | **हे रामाः** | सम्बोधनम् |

एवं कृष्णादयोऽप्यकारान्ताः ।

### सर्वः

## सर्वादीनि[१] सर्वनामानि[१] १ । १ । २७

सर्व विश्व उभय कतर कतम अन्य अन्यतर इतर पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् किम् एते शब्दाः सर्वनामसंज्ञाः स्युः ।
सर्व + सु = सर्व + स् = सर्वः । सर्व + औ = सर्वौ ।

## जसः[६] शी[१] ७ । १ । १७

अकारान्तात् सर्वनाम्नः परस्य जसः शी स्यात् ।
सर्व + जस् = सर्व + शी = सर्व + ई = सर्वे ।
सर्व + अम् = सर्वम् । सर्व + औट् = सर्व + औ = सर्वौ । सर्व + शस् = सर्व + अस् = सर्वास् = सर्वान् । सर्व + टा = सर्व + इन = सर्वेन = सर्वेण । सर्व + भ्याम् = सर्वाभ्याम् । सर्व + भिस् = सर्व + ऐस् = सर्वैस् = सर्वैः ।

## सर्वनाम्नः[५] स्मै[१] ७ । १ । १४

अकारान्तात् सर्वनाम्नः परस्य ङेः स्मै स्यात् ।
सर्व + ङे = सर्वस्मै ।
सर्वाभ्याम् । सर्व + भ्यस् = सर्वे + भ्यस् = सर्वेभ्यः ।

## ङसिङ्योः[६] स्मात्स्मिनौ[१] ७।१।१५

अकारान्तात् सर्वनाम्नः परयोर् ङसि ङि इत्येतयोर् यथासङ्ख्यं स्मात् स्मिन् इत्येतावादेशौ स्तः ।

सर्व + ङसि = सर्वस्मात् वा सर्वस्माद् ।

सर्वाभ्याम् । सर्वेभ्यः । सर्व + ङस् = सर्वस्य । सर्व + ओस् = सर्वे + ओस् = सर्व् + अय् + ओस् = सर्वयोस् = सर्वयोः ।

## आमि[७] सर्वनाम्नः[५] सुट्[१] ७।१।५२

अवर्णान्तात् सर्वनाम्नः परस्याऽमः सुडागमः स्यात् ।

सर्व + आम् = सर्व + स् + आम् = सर्व + साम् = सर्वे + साम् = सर्वेषाम् ।

सर्व + ङि = सर्वस्मिन् । सर्वयोः । सर्व + सुप् = सर्व + सु = सर्वे + सु = सर्वेषु । हे सर्व + सु = हे सर्व + स् = हे सर्व । हे सर्वौ । हे सर्वे ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **सर्वः** | **सर्वौ** | **सर्वे** | प्रथमा |
| **सर्वम्** | **सर्वौ** | **सर्वान्** | द्वितीया |
| **सर्वेण** | **सर्वाभ्याम्** | **सर्वैः** | तृतीया |
| **सर्वस्मै** | **सर्वाभ्याम्** | **सर्वेभ्यः** | चतुर्थी |
| **सर्वस्मात् , सर्वस्माद्** | **सर्वाभ्याम्** | **सर्वेभ्यः** | पञ्चमी |
| **सर्वस्य** | **सर्वयोः** | **सर्वेषाम्** | षष्ठी |
| **सर्वस्मिन्** | **सर्वयोः** | **सर्वेषु** | सप्तमी |
| **हे सर्व** | **हे सर्वौ** | **हे सर्वे** | सम्बोधनम् |

एवं विश्वादयोऽप्यकारान्ताः ।

पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व एषां तु प्रथमाया बहुवचने पूर्वे, पूर्वाः; परे, पराः; अवरे, अवराः; दक्षिणे, दक्षिणाः; उत्तरे, उत्तराः; अपरे, अपराः; अधरे, अधराः; स्वे, स्वाः इति रूपाणि भवन्ति । पञ्चम्या एकवचने पूर्वस्मात् वा पूर्वस्माद् , पूर्वात् वा पूर्वाद् ; परस्मात् वा परस्माद् , परात् वा पराद् ; अवरस्मात् वा अवरस्माद् , अवरात् वा अवराद् ; दक्षिणस्मात् वा दक्षिणस्माद् , दक्षिणात् वा दक्षिणाद् ; उत्तरस्मात् वा उत्तरस्माद् , उत्तरात् वा उत्तराद् ; अपरस्मात् वा अपरस्माद् , अपरात् वा अपराद् ; अधरस्मात् वा अधरस्माद् , अधरात् वा अधराद् ; स्वस्मात् वा स्वस्माद् , स्वात् वा स्वाद् इति रूपाणि भवन्ति । सप्तम्या एकवचने पूर्वस्मिन् , पूर्वे; परस्मिन् , परे; अवरस्मिन् , अवरे; दक्षिणस्मिन् , दक्षिणे; उत्तरस्मिन् , उत्तरे ; अपरस्मिन् , अपरे ; अधरस्मिन् , अधरे ; स्वस्मिन् , स्वे इति रूपाणि भवन्ति । शेषं सर्ववत् ।

## प्रथमचरमतयाल्पार्धकतिपयनेमा[१]श्च[६] १।१।३३

प्रथम चरम तयप्प्रत्ययान्त अल्प अर्ध कतिपय नेम इत्येते जसि वा सर्वनामसंज्ञाः स्युः ।

प्रथमे, प्रथमाः; चरमे, चरमाः; द्वितये, द्वितयाः; अल्पे, अल्पाः; अर्धे, अर्धाः; कतिपये, कतिपयाः । शेषं रामवत् ।

### तीयस्य ङित्सु वा

द्वितीयाय, द्वितीयस्मै; द्वितीयात् वा द्वितीयाद् , द्वितीयस्मात् वा द्वितीयस्माद् ; द्वितीये, द्वितीयस्मिन् ।

इत्यकारान्तपुंलिङ्गशब्दाः

---------------------

## अथाऽऽकारान्तपुंलिङ्गशब्दाः

### विश्वपाः = सर्वरक्षकः

विश्वपा + सु = विश्वपा + स् = विश्वपाः । विश्वपा + औ = विश्वपौ । विश्वपा + जस् = विश्वपा + अस् = विश्वपास् = विश्वपाः । विश्वपा + अम् = विश्वपाम् । विश्वपा + औट् = विश्वपा + औ = विश्वपौ ।

### सुड[1]नपुंसकस्य[6] १ । १ । ४३

सु औ जस् अम् औट् इत्येतानि पञ्च वचनानि सर्वनामस्थानसंज्ञानि स्युः , नपुंसकलिङ्गस्य तु न स्युः ।

### यचि[7] भम्[1] १ । ४ । १८

यादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् ।

### आतो[6] धातोः[6] ६ । ४ । १४०

आकारान्तधातोर् आकारलोपः स्याद् भसंज्ञायाम् ।

विश्वपा + शस् = विश्वपा + अस् = विश्वप् + अस् = विश्वपस् = विश्वपः । विश्वपा + टा = विश्वपा + आ = विश्वप् + आ = विश्वपा ।

विश्वपाभ्याम् । विश्वपा + भिस् = विश्वपाभिः । विश्वपा + ङे = विश्वपा + ए = विश्वप् + ए = विश्वपे । विश्वपाभ्याम् । विश्वपा + भ्यस् = विश्वपाभ्यः । विश्वपा + ङसि = विश्वपा + अस् = विश्वप् + अस् = विश्वपस् = विश्वपः । विश्वपाभ्याम् । विश्वपाभ्यः । विश्वपा + ङस् = विश्वपा + अस् = विश्वप् + अस् = विश्वपस् = विश्वपः । विश्वपा + ओस् = विश्वप् + ओस् = विश्वपोस् = विश्वपोः । विश्वपा + आम् = विश्वप् + आम् = विश्वपाम् । विश्वपा + ङि = विश्वपा + इ = विश्वप् + इ = विश्वपि । विश्वपोः । विश्वपा + सुप् = विश्वपासु । हे विश्वपाः । हे विश्वपौ । हे विश्वपाः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **विश्वपाः** | **विश्वपौ** | **विश्वपाः** | प्रथमा |
| **विश्वपाम्** | **विश्वपौ** | **विश्वपः** | द्वितीया |
| **विश्वपा** | **विश्वपाभ्याम्** | **विश्वपाभिः** | तृतीया |
| **विश्वपे** | **विश्वपाभ्याम्** | **विश्वपाभ्यः** | चतुर्थी |
| **विश्वपः** | **विश्वपाभ्याम्** | **विश्वपाभ्यः** | पञ्चमी |
| **विश्वपः** | **विश्वपोः** | **विश्वपाम्** | षष्ठी |
| **विश्वपि** | **विश्वपोः** | **विश्वपासु** | सप्तमी |
| **हे विश्वपाः** | **हे विश्वपौ** | **हे विश्वपाः** | सम्बोधनम् |

एवं शङ्खध्मादयः ।

धातुभिन्नानां शसादावाकारलोपो न भवति ।

हाहा: = गन्धर्वविशेष:

हाहा + सु = हाहा + स् = हाहा: । हाहा + औ = हाहौ । हाहा + जस् = हाहा + अस् = हाहास् = हाहा: । हाहा + अम् = हाहाम् । हाहा + औट् = हाहा + औ = हाहौ । हाहा + शस् = हाहा + अस् = हाहास् = हाहान् । हाहा + टा = हाहा + आ = हाहा । हाहाभ्याम् । हाहा + भिस् = हाहाभि: । हाहा + ङे = हाहा + ए = हाहै । हाहाभ्याम् । हाहा + भ्यस् = हाहाभ्य: । हाहा + ङसि = हाहा + अस् = हाहास् = हाहा: । हाहाभ्याम् । हाहाभ्य: । हाहा + ङस् = हाहा + अस् = हाहास् = हाहा: । हाहा + ओस् = हाहौस् = हाहौ: । हाहा + आम् = हाहाम् । हाहा + ङि = हाहा + इ = हाहे । हाहौ: । हाहा + सुप् = हाहासु । हे हाहा: । हे हाहौ । हे हाहा: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| हाहाः | हाहौ | हाहाः | प्रथमा |
| हाहाम् | हाहौ | हाहान् | द्वितीया |
| हाहा | हाहाभ्याम् | हाहाभिः | तृतीया |
| हाहै | हाहाभ्याम् | हाहाभ्यः | चतुर्थी |
| हाहाः | हाहाभ्याम् | हाहाभ्यः | पञ्चमी |
| हाहाः | हाहौः | हाहाम् | षष्ठी |
| हाहे | हाहौः | हाहासु | सप्तमी |
| हे हाहाः | हे हाहौ | हे हाहाः | सम्बोधनम् |

इत्याकारान्तपुंलिङ्गशब्दा:

-------------------------

## अथ इकारान्तपुंलिङ्गशब्दाः

हरि: = विष्णु:

हरि + सु = हरि + स् = हरि: । हरि + औ पूर्वसवर्णदीर्घ: हर् + ई = हरी ।

### जसि[7] च[1] ७ । ३ । १०९

ह्रस्वस्य गुणो भवति जसि परे ।

हरि + जस् = हरि + अस् = हरे + अस् = हर् + अय् + अस् = हरयस् = हरय: ।

हरि + अम् = हरिम् । हरि + औट् = हरि + औ = हरी । हरि + शस् = हरि + अस् = हरीस् = हरीन् ।

### शेषो[1] घ्य[1]सखि[1] १ । ४ । ७

ह्रस्वम् इवर्णान्तम् उवर्णान्तं चाऽनदीसंज्ञं घिसंज्ञं स्यात् , सखिशब्दस् तु घिसंज्ञो न भवति ।

### आङो[6] ना[1]ऽस्त्रियाम्[7] ७ । ३ । १२०

घिसंज्ञकात् परस्य टा इत्यस्य ना स्यात् , न तु स्त्रियाम् ।

हरि + टा = हरि + ना = हरिणा ।

हरिभ्याम् । हरि + भिस् = हरिभि: ।

## घे[६]र्ङिति[७] ७ । ३ । १११

ङिति सुपि घिसंज्ञकस्य गुणः ।
हरि + ङे = हरि + ए = हरे + ए = हर् + अय् + ए = हरये ।
हरिभ्याम् । हरि + भ्यस् = हरिभ्यः ।

## ङसिङसो[६]श्च[६] ६ । १ । ११०

एङो ङसिङसोर् अकारे परे पूर्वरूपम् एकादेशः ।
हरि + ङसि = हरि + अस् = हरे + अस् = हरेस् = हरेः ।
हरिभ्याम् । हरिभ्यः ।
हरि + ङस् = हरि + अस् = हरे + अस् = हरेस् = हरेः ।
हरि + ओस् = हर् + य् + ओस् = हर्योस् = हर्योः । हरि + आम् = हरि + न् + आम् = हरि + नाम् = हरी + नाम् = हरीणाम् ।

## अच्[१] च[१] घेः[६] ७ । ३ । ११९

घिसंज्ञकात् परस्य ङेर् औकारादेशो भवति, तस्य च घेर् अकारादेशो भवति ।
हरि + ङि = हर + औ = हरौ ।
हर्योः । हरि + सुप् = हरि + सु = हरिषु ।

## ह्रस्वस्य[६] गुणः[१] ७ । ३ । १०८

सम्बोधनैकवचने परे ह्रस्वस्य गुणो भवति, नपुंसके वा ।
हे हरि + सु = हे हरि + स् = हे हरे + स् = हे हरे ।
हे हरी । हे हरयः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| हरिः | हरी | हरयः | प्रथमा |
| हरिम् | हरी | हरीन् | द्वितीया |
| हरिणा | हरिभ्याम् | हरिभिः | तृतीया |
| हरये | हरिभ्याम् | हरिभ्यः | चतुर्थी |
| हरेः | हरिभ्याम् | हरिभ्यः | पञ्चमी |
| हरेः | हर्योः | हरीणाम् | षष्ठी |
| हरौ | हर्योः | हरिषु | सप्तमी |
| हे हरे | हे हरी | हे हरयः | सम्बोधनम् |

एवं कव्यादयः ।

### सखा = मित्रम्

## अनङ्[१] सौ[७] ७ । १ । ९३

सखिशब्दस्य इकारस्य स्थानेऽनङ् स्यात् सौ परे, सम्बोधने तु न भवति ।
सखि + सु = सखि + स् = सख् + अनङ् + स् = सख् + अन् + स् = सखन् + स्

## अलो[५]ऽन्त्यात्[५] पूर्व[१] उपधा[१] १।१।६५

अन्त्याद् अलः पूर्वो वर्ण उपधासंज्ञः स्यात्।
इति ख इत्यस्याऽकारस्योपधासंज्ञा।

## सर्वनामस्थाने[७] चा[६]ऽसम्बुद्धौ[७] ६।४।८

नान्तस्योपधाया दीर्घः स्यात् सर्वनामस्थाने परे, सम्बोधनैकवचने परे तु न भवति।
= सखान् + स्

## हल्ङ्चाब्भ्यो[५] दीर्घात्[५] सुतिस्य[६]पृक्तं[१] हल्[१] ६।१।६८

हलन्तात् परं दीर्घौ यौ ङ्चापौ तदन्ताच् च परं सु-ति-सि-सम्बन्धि हल् लुप्यते, तच् चेद् धल्मात्रं स्यात्।
= सखान्

## न[६] लोपः[१] प्रातिपदिकान्तस्य[६] ८।२।७

प्रातिपदिकसंज्ञकं यत् पदं तदन्तस्य नस्य लोपः।
= सखा।

## सख्युर[५]सम्बुद्धौ[७] ७।१।९२

सखिशब्दात् परं सम्बोधनैकवचनवर्जं सर्वनामस्थानं णिद्वत् स्यात्।

## अचो[६] ञ्णिति[७] ७।२।११५

अजन्तानां वृद्धिर् ञिति णिति च परे।

सखि + औ = सखै + औ = सख् + आय् + औ = सखायौ। सखि + जस् = सखि + अस् = सखै + अस् = सख् + आय् + अस् = सखायस् = सखायः। सखि + अम् = सखै + अम् = सख् + आय् + अम् = सखायम्। सखि + औट् = सखि + औ = सखै + औ = सख् + आय् + औ = सखायौ।
सखि + शस् = सखि + अस् = सखीस् = सखीन्। सखि + टा = सखि + आ = सख् + य् + आ = सख्या। सखिभ्याम्। सखि + भिस् = सखिभिः। सखि + ङे = सखि + ए = सख् + य् + ए = सख्ये। सखिभ्याम्। सखि + भ्यस् = सखिभ्यः।

## ख्यत्यात्[५] परस्य[६] ६।१।११२

ख्य् त्य् इत्याभ्यां परयोर् ङसिङसोर् अकारस्य उकारः स्यात्।

सखि + ङसि = सखि + अस् = सख् + य् + अस् = सख्य् + अस् = सख्य् + उस् = सख्युस् = सख्युः। सखिभ्याम्। सखिभ्यः।
सखि + ङस् = सखि + अस् = सख् + य् + अस् = सख्य् + अस् = सख्य् + उस् = सख्युस् = सख्युः। सखि + ओस् = सख् + य् + ओस् = सख्योस् = सख्योः। सखि + आम् = सखि + न् + आम् = सखि + नाम् = सखीनाम्।

## औत्[1] ७।३।११८

इकारात् परस्य ङेर् औकारः स्यात् ।

सखि + ङि = सखि + औ = सख् + य् + औ = सख्यौ ।

सख्योः । सखि + सुप् = सखि + सु = सखिषु । हे सखि + सु = हे सखि + स् = हे सखे + स् = हे सखे । हे सखायौ । हे सखायः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **सखा** | **सखायौ** | **सखायः** | प्रथमा |
| **सखायम्** | **सखायौ** | **सखीन्** | द्वितीया |
| **सख्या** | **सखिभ्याम्** | **सखिभिः** | तृतीया |
| **सख्ये** | **सखिभ्याम्** | **सखिभ्यः** | चतुर्थी |
| **सख्युः** | **सखिभ्याम्** | **सखिभ्यः** | पञ्चमी |
| **सख्युः** | **सख्योः** | **सखीनाम्** | षष्ठी |
| **सख्यौ** | **सख्योः** | **सखिषु** | सप्तमी |
| **हे सखे** | **हे सखायौ** | **हे सखायः** | सम्बोधनम् |

पतिः

## पतिः[1] समास[7] एव[1] १।४।८

पतिशब्दः समास एव घिसंज्ञः स्यात् ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **पतिः** | **पती** | **पतयः** | प्रथमा |
| **पतिम्** | **पती** | **पतीन्** | द्वितीया |
| **पत्या** | **पतिभ्याम्** | **पतिभिः** | तृतीया |
| **पत्ये** | **पतिभ्याम्** | **पतिभ्यः** | चतुर्थी |
| **पत्युः** | **पतिभ्याम्** | **पतिभ्यः** | पञ्चमी |
| **पत्युः** | **पत्योः** | **पतीनाम्** | षष्ठी |
| **पत्यौ** | **पत्योः** | **पतिषु** | सप्तमी |
| **हे पते** | **हे पती** | **हे पतयः** | सम्बोधनम् |

समासे तु

भूपतिः = राजा

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **भूपतिः** | **भूपती** | **भूपतयः** | प्रथमा |
| **भूपतिम्** | **भूपती** | **भूपतीन्** | द्वितीया |
| **भूपतिना** | **भूपतिभ्याम्** | **भूपतिभिः** | तृतीया |
| **भूपतये** | **भूपतिभ्याम्** | **भूपतिभ्यः** | चतुर्थी |
| **भूपतेः** | **भूपतिभ्याम्** | **भूपतिभ्यः** | पञ्चमी |
| **भूपतेः** | **भूपत्योः** | **भूपतीनाम्** | षष्ठी |
| **भूपतौ** | **भूपत्योः** | **भूपतिषु** | सप्तमी |
| **हे भूपते** | **हे भूपती** | **हे भूपतयः** | सम्बोधनम् |

एवं पशुपत्यादयः ।

## कति

कतिशब्दो नित्यं बहुवचनान्तः ।

### बहुगणवतुडति[१] सङ्ख्या[१] १ । १ । २३

बहु गण वतुप्रत्ययान्त डतिप्रत्ययान्त इत्येते सङ्ख्यासंज्ञाः स्युः ।

### डति[१] च[،] १ । १ । २५

डत्यन्ता सङ्ख्या षट्संज्ञा स्यात् ।

### षड्भ्यो[५] लुक्[१] ७ । १ । २२

षट्संज्ञकेभ्यः परयोर् जस्-शसोर् लुक् स्यात् ।

| बहुवचनानि | विभक्तयः |
|---|---|
| **कति** | प्रथमा |
| **कति** | द्वितीया |
| **कतिभिः** | तृतीया |
| **कतिभ्यः** | चतुर्थी |
| **कतिभ्यः** | पञ्चमी |
| **कतीनाम्** | षष्ठी |
| **कतिषु** | सप्तमी |
| **हे कति** | सम्बोधनम् |

युष्मदस्मत्षट्संज्ञकास् त्रिषु लिङ्गेषु सरूपाः ।

## त्रयः

त्रिशब्दो नित्यं बहुवचनान्तः ।

त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः ।

### त्रे[६]स्त्रयः[१] ७ । १ । ५३

त्रिशब्दस्य त्रय आदेशः स्याद् आमि ।

त्रि + आम् = त्रय + आम् = त्रय + न् + आम् = त्रया + नाम् = त्रयाणाम् ।

त्रिषु ।

| बहुवचनानि | विभक्तयः |
|---|---|
| त्रयः | प्रथमा |
| त्रीन् | द्वितीया |
| त्रिभिः | तृतीया |
| त्रिभ्यः | चतुर्थी |
| त्रिभ्यः | पञ्चमी |
| त्रयाणाम् | षष्ठी |
| त्रिषु | सप्तमी |
| हे त्रयः | सम्बोधनम् |

## द्वौ

द्विशब्दो नित्यं द्विवचनान्तः ।

### त्यदादीनामः[६][१] ७ । २ । १०२

त्यद् तद् यद् एतद् इदम् अदस् द्वि इत्येषां शब्दानाम् अन्त्येऽकारः स्याद् विभक्तौ ।
द्वि + औ = द्व + औ = द्वौ । द्वि + औट् = द्वि + औ = द्व + औ = द्वौ । द्वि + भ्याम् = द्व + भ्याम् = द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वि + ओस् = द्व + ओस् = द्वे + ओस् = द्व् + अय् + ओस् = द्वयोस् = द्वयोः । द्वयोः ।

| द्विवचनानि | विभक्तयः |
|---|---|
| **द्वौ** | प्रथमा |
| **द्वौ** | द्वितीया |
| **द्वाभ्याम्** | तृतीया |
| **द्वाभ्याम्** | चतुर्थी |
| **द्वाभ्याम्** | पञ्चमी |
| **द्वयोः** | षष्ठी |
| **द्वयोः** | सप्तमी |
| **हे द्वौ** | सम्बोधनम् |

इति इकारान्तपुंलिङ्गशब्दाः

---

## अथ ईकारान्तपुंलिङ्गशब्दाः

### पपीः = सूर्यः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **पपीः** | **पप्यौ** | **पप्यः** | प्रथमा |
| **पपीम्** | **पप्यौ** | **पपीन्** | द्वितीया |
| **पप्या** | **पपीभ्याम्** | **पपीभिः** | तृतीया |
| **पप्ये** | **पपीभ्याम्** | **पपीभ्यः** | चतुर्थी |
| **पप्यः** | **पपीभ्याम्** | **पपीभ्यः** | पञ्चमी |
| **पप्यः** | **पप्योः** | **पप्याम्** | षष्ठी |
| **पपी** | **पप्योः** | **पपीषु** | सप्तमी |
| **हे पपीः** | **हे पप्यौ** | **हे पप्यः** | सम्बोधनम् |

एवं वातप्रम्यादयः ।

### सुधीः = विद्वान्

### अचि[७] श्नुधातुभ्रुवां[६] य्वोरि[६]यङुवङौ[१] ६ । ४ । ७७

श्नुप्रत्ययान्तस्य इवर्णान्तस्य उवर्णान्तस्य च धातोर् भ्रू इत्यस्य चाऽन्त इयङुवङौ स्तोऽजादौ प्रत्यये परे ।
सुधी + औ = सुध् + इयङ् + औ = सुध् + इय् + औ = सुधियौ ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **सुधीः** | **सुधियौ** | **सुधियः** | प्रथमा |
| **सुधियम्** | **सुधियौ** | **सुधियः** | द्वितीया |
| **सुधिया** | **सुधीभ्याम्** | **सुधीभिः** | तृतीया |
| **सुधिये** | **सुधीभ्याम्** | **सुधीभ्यः** | चतुर्थी |
| **सुधियः** | **सुधीभ्याम्** | **सुधीभ्यः** | पञ्चमी |
| **सुधियः** | **सुधियोः** | **सुधियाम्** | षष्ठी |
| **सुधियि** | **सुधियोः** | **सुधीषु** | सप्तमी |
| **हे सुधीः** | **हे सुधियौ** | **हे सुधियः** | सम्बोधनम् |

एवं यवक्र्यादयः ।

सेनानीः = सेनापतिः

## एर्[६]नेकाचो[६]ऽसंयोगपूर्वस्य[६] ६ । ४ । ८२

धात्ववयवसंयोगपूर्वो न भवति य इवर्णस् तदन्तो यो धातुस् तदन्तस्याऽनेकाचोऽन्त्ये यण् स्याद् अजादौ प्रत्यये परे ।

सुधियस् तु न यण् ।

सेनानी + औ = सेनान् + य् + औ = सेनान्यौ ।

## ङेर्[६]आम्[१] नद्याम्नीभ्यः[५] ७ । ३ । ११६

नद्यन्ताद् आबन्तान् नीशब्दाच् च परस्य ङेर् आम् ।

सेनानी + ङि = सेनानी + आम् = सेनान्याम् ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **सेनानीः** | **सेनान्यौ** | **सेनान्यः** | प्रथमा |
| **सेनान्यम्** | **सेनान्यौ** | **सेनान्यः** | द्वितीया |
| **सेनान्या** | **सेनानीभ्याम्** | **सेनानीभिः** | तृतीया |
| **सेनान्ये** | **सेनानीभ्याम्** | **सेनानीभ्यः** | चतुर्थी |
| **सेनान्यः** | **सेनानीभ्याम्** | **सेनानीभ्यः** | पञ्चमी |
| **सेनान्यः** | **सेनान्योः** | **सेनान्याम्** | षष्ठी |
| **सेनान्याम्** | **सेनान्योः** | **सेनानीषु** | सप्तमी |
| **हे सेनानीः** | **हे सेनान्यौ** | **हे सेनान्यः** | सम्बोधनम् |

एवं ग्रामण्यादयः ।

इति ईकारान्तपुंलिङ्गशब्दाः

---

## अथ उकारान्तपुंलिङ्गशब्दाः

### शम्भुः = शिवः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| शम्भुः | शम्भू | शम्भवः | प्रथमा |
| शम्भुम् | शम्भू | शम्भून् | द्वितीया |
| शम्भुना | शम्भुभ्याम् | शम्भुभिः | तृतीया |
| शम्भवे | शम्भुभ्याम् | शम्भुभ्यः | चतुर्थी |
| शम्भोः | शम्भुभ्याम् | शम्भुभ्यः | पञ्चमी |
| शम्भोः | शम्भ्वोः | शम्भूनाम् | षष्ठी |
| शम्भौ | शम्भ्वोः | शम्भुषु | सप्तमी |
| हे शम्भो | हे शम्भू | हे शम्भवः | सम्बोधनम् |

एवं भान्वादयः ।

इति उकारान्तपुंलिङ्गशब्दाः

-------------------------

## अथ ऊकारान्तपुंलिङ्गशब्दाः

### हूहूः = गन्धर्वविशेषः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| हूहूः | हूह्वौ | हूह्वः | प्रथमा |
| हूहूम् | हूह्वौ | हूहून् | द्वितीया |
| हूह्वा | हूहूभ्याम् | हूहूभिः | तृतीया |
| हूह्वे | हूहूभ्याम् | हूहूभ्यः | चतुर्थी |
| हूह्वः | हूहूभ्याम् | हूहूभ्यः | पञ्चमी |
| हूह्वः | हूह्वोः | हूह्वाम् | षष्ठी |
| हूह्वि | हूह्वोः | हूहूषु | सप्तमी |
| हे हूहूः | हे हूह्वौ | हे हूह्वः | सम्बोधनम् |

### स्वयम्भूः = ब्रह्मा

स्वयम्भू + औ = स्वयम्भ् + उवङ् + औ = स्वयम्भ् + उव् + औ = स्वयम्भुवौ ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| स्वयम्भूः | स्वयम्भुवौ | स्वयम्भुवः | प्रथमा |
| स्वयम्भुवम् | स्वयम्भुवौ | स्वयम्भुवः | द्वितीया |
| स्वयम्भुवा | स्वयम्भूभ्याम् | स्वयम्भूभिः | तृतीया |
| स्वयम्भुवे | स्वयम्भूभ्याम् | स्वयम्भूभ्यः | चतुर्थी |
| स्वयम्भुवः | स्वयम्भूभ्याम् | स्वयम्भूभ्यः | पञ्चमी |
| स्वयम्भुवः | स्वयम्भुवोः | स्वयम्भुवाम् | षष्ठी |
| स्वयम्भुवि | स्वयम्भुवोः | स्वयम्भूषु | सप्तमी |
| हे स्वयम्भूः | हे स्वयम्भुवौ | हे स्वयम्भुवः | सम्बोधनम् |

एवं स्वभ्वादयः ।

इति ऊकारान्तपुंलिङ्गशब्दाः

-------------------------

## अथ ऋकारान्तपुंलिङ्गशब्दाः

### धाता = ब्रह्मा

### ऋदुशनस्पुरुदंसोऽनेहसां[६] च[१] ७।१।९४

ऋकारान्तानाम् उशनस् पुरुदंसस् अनेहस् इत्येतेषां चाऽन्तेऽनङ् स्यात् सम्बोधनैकवचनवर्जं सौ परे।

धातृ + सु = धातृ + स् = धात् + अनङ् + स् = धात् + अन् + स् = धातान् + स् = धातान् = धाता।

### ऋतो[६] ङिसर्वनामस्थानयोः[७] ७।३।११०

ऋकारान्तस्य गुणो ङौ सर्वनामस्थाने च परे।

धातृ + औ = धात् + अर् + औ

### अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्[६] ६।४।११

अप् इत्येतस्य तृन्प्रत्ययान्तस्य तृच्प्रत्ययान्तस्य स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षतृ होतृ पोतृ प्रशास्तृ इत्येतेषाम् उपधाया दीर्घः सर्वनामस्थाने परे, सम्बोधनैकवचने परे तु न भवति।

= धातार् + औ = धातारौ। धातृ + जस् = धातृ + अस् = धात् + अर् + अस् = धातार् + अस् = धातारस् = धातारः। धातृ + अम् = धात् + अर् + अम् = धातार् + अम् = धातारम्। धातृ + औट् = धातृ + औ = धात् + अर् + औ = धातार् + औ = धातारौ।

धातृ + शस् = धातृ + अस् = धातॄस् = धातॄन्। धातृ + टा = धातृ + आ = धात् + र् + आ = धात्रा। धातृभ्याम्। धातृ + भिस् = धातृभिः। धातृ + ङे = धातृ + ए = धात् + र् + ए = धात्रे। धातृभ्याम्। धातृ + भ्यस् = धातृभ्यः।

### ऋत[५] उत्[१] ६।१।१११

ऋकारान्तात् परयोर् ङसिङसोर् अकारे पर उकार एकादेशो रपरः।

धातृ + ङसि = धातृ + अस् = धात् + उर् + स् = धातुर् + स्

### संयोगान्तस्य[६] लोपः[१] ८।२।२३

संयोगान्तं यत् पदं तदन्तस्य लोपः स्यात्।

= धातुर् = धातुः।

धातृभ्याम्। धातृभ्यः। धातृ + ङस् = धातृ + अस् = धात् + उर् + स् = धातुर् + स् = धातुर् = धातुः। धातृ + ओस् = धात् + र् + ओस् = धात्रोस् = धात्रोः। धातृ + आम् = धातृ + न् + आम् = धातृ + नाम् = धातॄ + नाम् = धातॄणाम्। धातृ + ङि = धातृ + इ = धात् + अर् + इ = धातरि। धात्रोः। धातृ + सुप् = धातृ + सु = धातृषु। हे धातृ + सु = हे धातृ + स् = हे धात् + अर् + स् = हे धातर् + स् = हे धातर् = हे धातः। हे धातारौ। हे धातारः।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **धाता** | **धातारौ** | **धातारः** | प्रथमा |
| **धातारम्** | **धातारौ** | **धातॄन्** | द्वितीया |
| **धात्रा** | **धातृभ्याम्** | **धातृभिः** | तृतीया |
| **धात्रे** | **धातृभ्याम्** | **धातृभ्यः** | चतुर्थी |
| **धातुः** | **धातृभ्याम्** | **धातृभ्यः** | पञ्चमी |
| **धातुः** | **धात्रोः** | **धातॄणाम्** | षष्ठी |
| **धातरि** | **धात्रोः** | **धातृषु** | सप्तमी |
| **हे धातः** | **हे धातारौ** | **हे धातारः** | सम्बोधनम् |

एवं नप्त्रादयः ।

## पिता

पितृ + सु = पितृ + स् = पित् + अनङ् + स् = पित् + अन् + स् = पितान् + स् = पितान् = पिता । पितृ + औ = पित् + अर् + औ = पितरौ । पितृ + जस् = पितृ + अस् = पित् + अर् + अस् = पितरस् = पितरः । पितृ + अम् = पित् + अर् + अम् = पितरम् । पितृ + औट् = पितृ + औ = पित् + अर् + औ = पितरौ । पितृ + शस् = पितृ + अस् = पितॄस् = पितॄन् । पितृ + टा = पितृ + आ = पित् + र् + आ = पित्रा । पितृभ्याम् । पितृ + भिस् = पितृभिः । पितृ + ङे = पितृ + ए = पित् + र् + ए = पित्रे । पितृभ्याम् । पितृ + भ्यस् = पितृभ्यः । पितृ + ङसि = पितृ + अस् = पित् + उर् + स् = पितुर् + स् = पितुर् = पितुः । पितृभ्याम् । पितृभ्यः । पितृ + ङस् = पितृ + अस् = पित् + उर् + स् = पितुर् + स् = पितुर् = पितुः । पितृ + ओस् = पित् + र् + ओस् = पित्रोस् = पित्रोः । पितृ + आम् = पितृ + न् + आम् = पितृ + नाम् = पितॄ + नाम् = पितॄणाम् । पितृ + ङि = पितृ + इ = पित् + अर् + इ = पितरि । पित्रोः । पितृ + सुप् = पितृ + सु = पितृषु । हे पितृ + सु = हे पितृ + स् = हे पित् + अर् + स् = हे पितर् + स् = हे पितर् = हे पितः । हे पितरौ । हे पितरः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **पिता** | **पितरौ** | **पितरः** | प्रथमा |
| **पितरम्** | **पितरौ** | **पितॄन्** | द्वितीया |
| **पित्रा** | **पितृभ्याम्** | **पितृभिः** | तृतीया |
| **पित्रे** | **पितृभ्याम्** | **पितृभ्यः** | चतुर्थी |
| **पितुः** | **पितृभ्याम्** | **पितृभ्यः** | पञ्चमी |
| **पितुः** | **पित्रोः** | **पितॄणाम्** | षष्ठी |
| **पितरि** | **पित्रोः** | **पितृषु** | सप्तमी |
| **हे पितः** | **हे पितरौ** | **हे पितरः** | सम्बोधनम् |

एवं जामात्रादयः ।

## ना = मनुष्यः

नृ + सु = नृ + स् = न् + अनङ् + स् = न् + अन् + स् = नान् + स् = नान् = ना । नृ + औ = न् + अर् + औ = नरौ । नृ + जस् = नृ + अस् = न् + अर् + अस् = नरस् = नरः । नृ + अम् =

न् + अर् + अम् = नरम् । नृ + औट् = नृ + औ = न् + अर् + औ = नरौ । नृ + शस् = नृ + अस् = नॄस् = नॄन् । नृ + टा = नृ + आ = न् + र् + आ = न्रा । नृभ्याम् । नृ + भिस् = नृभिः । नृ + ङे = नृ + ए = न् + र् + ए = न्रे । नृभ्याम् । नृ + भ्यस् = नृभ्यः । नृ + ङसि = नृ + अस् = न् + उर् + स् = नुर् + स् = नुर् = नुः । नृभ्याम् । नृभ्यः । नृ + ङस् = नृ + अस् = न् + उर् + स् = नुर् + स् = नुर् = नुः । नृ + ओस् = न् + र् + ओस् = न्रोस् = न्रोः । नृ + आम् = नृ + न् + आम् = नृ + नाम् = नॄ + नाम् = नॄणाम् ।

## नृ[६] च[१] ६ । ४ । ६

नृ इत्येतस्य नामि दीर्घो वा स्यात् ।

नृ + आम् = नृ + न् + आम् = नृ + नाम् = नृणाम् ।

नृ + ङि = नृ + इ = न् + अर् + इ = नरि । न्रोः । नृ + सुप् = नृ + सु = नृषु । हे नृ + सु = हे नृ + स् = हे न् + अर् + स् = हे नर् + स् = हे नर् = हे नः । हे नरौ । हे नरः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| ना | **नरौ** | नरः | प्रथमा |
| **नरम्** | **नरौ** | **नॄन्** | द्वितीया |
| **न्रा** | **नृभ्याम्** | **नृभिः** | तृतीया |
| **न्रे** | **नृभ्याम्** | **नृभ्यः** | चतुर्थी |
| **नुः** | **नृभ्याम्** | **नृभ्यः** | पञ्चमी |
| **नुः** | **न्रोः** | **नॄणाम् , नृणाम्** | षष्ठी |
| **नरि** | **न्रोः** | **नृषु** | सप्तमी |
| **हे नः** | **हे नरौ** | **हे नरः** | सम्बोधनम् |

इति ऋकारान्तपुंलिङ्गशब्दाः

---

### अथ ओकारान्तपुंलिङ्गशब्दः

गौः

## ओतो[५] णित्[१] ७ । १ । ९०

ओकाराद् विहितं सर्वनामस्थानं णिद्वद् स्यात् ।

गो + सु = गो + स् णिद्वद्भावाद् वृद्धिः गौ + स् = गौः । गो + औ = गौ + औ = ग् + आव् + औ = गावौ । गो + जस् = गो + अस् = गौ + अस् = ग् + आव् + अस् = गावस् = गावः ।

## औ[१]तो[५]ऽम्शसोः[६] ६ । १ । ९३

ओकाराद् अम्शसोर् अचि पूर्वपरयोर् आकार एकादेशः ।

गो + अम् = ग् + आम् = गाम् ।

गो + औट् = गो + औ = गौ + औ = ग् + आव् + औ = गावौ । गो + शस् = गो + अस् = ग् + आस् = गास् = गाः । गो + टा = गो + आ = ग् + अव् + आ = गवा । गोभ्याम् । गो + भिस् =

गोभिः । गो + ङे = गो + ए = ग् + अव् + ए = गवे । गोभ्याम् । गो + भ्यस् = गोभ्यः । गो + ङसि = गो + अस् = गोस् = गोः । गोभ्याम् । गोभ्यः । गो + ङस् = गो + अस् = गोस् = गोः । गो + ओस् = ग् + अव् + ओस् = गवोस् = गवोः । गो + आम् = ग् + अव् + आम् = गवाम् । गो + ङि = ग् + अव् + इ = गवि । गवोः । गो + सुप् = गो + सु = गोषु । हे गौः । हे गावौ । हे गावः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **गौः** | **गावौ** | **गावः** | प्रथमा |
| **गाम्** | **गावौ** | **गाः** | द्वितीया |
| **गवा** | **गोभ्याम्** | **गोभिः** | तृतीया |
| **गवे** | **गोभ्याम्** | **गोभ्यः** | चतुर्थी |
| **गोः** | **गोभ्याम्** | **गोभ्यः** | पञ्चमी |
| **गोः** | **गवोः** | **गवाम्** | षष्ठी |
| **गवि** | **गवोः** | **गोषु** | सप्तमी |
| **हे गौः** | **हे गावौ** | **हे गावः** | सम्बोधनम् |

इति ओकारान्तपुंलिङ्गशब्दः

------------------------

## अथ औकारान्तपुंलिङ्गशब्दः

ग्लौः = चन्द्रमाः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **ग्लौः** | **ग्लावौ** | **ग्लावः** | प्रथमा |
| **ग्लावम्** | **ग्लावौ** | **ग्लावः** | द्वितीया |
| **ग्लावा** | **ग्लौभ्याम्** | **ग्लौभिः** | तृतीया |
| **ग्लावे** | **ग्लौभ्याम्** | **ग्लौभ्यः** | चतुर्थी |
| **ग्लावः** | **ग्लौभ्याम्** | **ग्लौभ्यः** | पञ्चमी |
| **ग्लावः** | **ग्लावोः** | **ग्लावाम्** | षष्ठी |
| **ग्लावि** | **ग्लावोः** | **ग्लौषु** | सप्तमी |
| **हे ग्लौः** | **हे ग्लावौ** | **हे ग्लावः** | सम्बोधनम् |

इति औकारान्तपुंलिङ्गशब्दः

------------------------

## इत्यजन्तपुंलिङ्गप्रकरणम्

***

# अथाऽजन्तस्त्रीलिङ्गप्रकरणम्

## अथाऽकारान्तस्त्रीलिङ्गशब्दाः

### रमा = लक्ष्मीः

रमा + सु = रमा + स् = रमा ।

### औङ[१] आपः[५] ७।१।१८

आबन्तात् परस्य औङः शी स्यात् ।

रमा + औ = रमा + शी = रमा + ई = रमे ।

रमा + जस् = रमा + अस् = रमास् = रमाः । रमा + अम् = रमाम् । रमा + औट् = रमा + औ = रमा + शी + रमा + ई = रमे । रमा + शस् = रमा + अस् = रमास् = रमाः ।

### आङि[७] चा[१]ऽपः[६] ७।३।१०५

आङि ओसि चाऽबन्तस्य एकारः ।

रमा + टा = रमा + आ = रमे + आ = रम् + अय् + आ = रमया ।

रमाभ्याम् । रमा + भिस् = रमाभिः ।

### याडा[१]पः[५] ७।३।११३

आबन्तात् ङितो याडागमः ।

रमा + ङे = रमा + ए = रमा + या + ए = रमायै ।

रमाभ्याम् । रमा + भ्यस् = रमाभ्यः । रमा + ङसि = रमा + अस् = रमा + या + अस् = रमायास् = रमायाः । रमाभ्याम् । रमाभ्यः । रमा + ङस् = रमा + अस् = रमा + या + अस् = रमायास् = रमायाः । रमा + ओस् = रमे + ओस् = रम् + अय् + ओस् = रमयोस् = रमयोः । रमा + आम् = रमा + न् + आम् = रमा + नाम् = रमाणाम् । रमा + ङि = रमा + आम् = रमा + या + आम् = रमायाम् । रमयोः । रमा + सुप् = रमासु ।

### सम्बुद्धौ[७] च[१] ७।३।१०६

आबन्तस्य एकारः स्यात् सम्बोधनैकवचने परे ।

हे रमा + सु = हे रमा + स् = हे रमे + स् = हे रमे । हे रमे । हे रमाः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| रमा | रमे | रमाः | प्रथमा |
| रमाम् | रमे | रमाः | द्वितीया |
| रमया | रमाभ्याम् | रमाभिः | तृतीया |
| रमायै | रमाभ्याम् | रमाभ्यः | चतुर्थी |
| रमायाः | रमाभ्याम् | रमाभ्यः | पञ्चमी |
| रमायाः | रमयोः | रमाणाम् | षष्ठी |
| रमायाम् | रमयोः | रमासु | सप्तमी |
| हे रमे | हे रमे | हे रमाः | सम्बोधनम् |

एवं दुर्गादयः ।

जरा = वार्धकम्

जरा + सु = जरा + स् = जरा ।

## जराया[१] जरस[२]न्यतरस्याम्[३] ७ । २ । १०१

**जराया जरस् वा स्याद् अजादौ विभक्तौ ।**

जरा + औ = जरस् + औ = जरसौ वा जरा + औ = जरा + शी = जरा + ई = जरे । जरा + जस् = जरा + अस् = जरस् + अस् = जरसस् = जरसः वा जरा + जस् = जरा + अस् = जरास् = जराः । जरा + अम् = जरस् + अम् = जरसम् वा जरा + अम् = जराम् । जरा + औट् = जरा + औ = जरस् + औ = जरसौ वा जरा + औट् = जरा + औ = जरा + शी = जरा + ई = जरे । जरा + शस् = जरा + अस् = जरस् + अस् = जरसस् = जरसः वा जरा + शस् = जरा + अस् = जरास् = जराः । जरा + टा = जरा + आ = जरस् + आ = जरसा वा जरा + टा = जरा + आ = जरे + आ = जर् + अय् + आ = जरया ।

जराभ्याम् । जरा + भिस् = जराभिः । जरा + ङे = जरा + ए = जरस् + ए = जरसे वा जरा + ङे = जरा + ए = जरा + या + ए = जरायै । जराभ्याम् । जरा + भ्यस् = जराभ्यः । जरा + ङसि = जरा + अस् = जरस् + अस् = जरसस् = जरसः वा जरा + ङसि = जरा + अस् = जरा + या + अस् = जरायास् = जरायाः । जराभ्याम् । जराभ्यः । जरा + ङस् = जरा + अस् = जरस् + अस् = जरसस् = जरसः वा जरा + ङस् = जरा + अस् = जरा + या + अस् = जरायास् = जरायाः । जरा + ओस् = जरस् + ओस् = जरसोस् = जरसोः वा जरा + ओस् = जरे + ओस् = जर् + अय् + ओस् = जरयोस् = जरयोः । जरा + आम् = जरस् + आम् = जरसाम् वा जरा + आम् = जरा + न् + आम् = जरा + नाम् = जराणाम् । जरा + ङि = जरा + इ = जरस् + इ = जरसि वा जरा + ङि = जरा + आम् = जरा + या + आम् = जरायाम् । जरसोः वा जरयोः । जरा + सुप् = जरासु । हे जरा + सु = हे जरा + स् = हे जरे + स् = हे जरे । हे जरसौ वा हे जरे । हे जरसः वा हे जराः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| जरा | जरसौ, जरे | जरसः, जराः | प्रथमा |
| जरसम् , जराम् | जरसौ, जरे | जरसः, जराः | द्वितीया |
| जरसा, जरया | जराभ्याम् | जराभिः | तृतीया |
| जरसे, जरायै | जराभ्याम् | जराभ्यः | चतुर्थी |
| जरसः, जरायाः | जराभ्याम् | जराभ्यः | पञ्चमी |
| जरसः, जरायाः | जरसोः, जरयोः | जरसाम् , जराणाम् | षष्ठी |
| जरसि, जरायाम् | जरसोः, जरयोः | जरासु | सप्तमी |
| हे जरे | हे जरसौ, हे जरे | हे जरसः, हे जराः | सम्बोधनम् |

सर्वा

सर्वा + सु = सर्वा + स् = सर्वा । सर्वा + औ = सर्वा + शी = सर्वा + ई = सर्वे । सर्वा + जस् = सर्वा + अस् = सर्वास् = सर्वाः । सर्वा + अम् = सर्वाम् । सर्वा + औट् = सर्वा + औ = सर्वा + शी = सर्वा + ई = सर्वे । सर्वा + शस् = सर्वा + अस् = सर्वास् = सर्वाः । सर्वा + टा = सर्वा + आ = सर्वे + आ = सर्व् + अय् + आ = सर्वया । सर्वाभ्याम् । सर्वा + भिस् = सर्वाभिः ।

## सर्वनाम्न:[५] स्याड्[१]ढ्रस्व[१]श्च[१] ७।३।११४

आबन्तात् सर्वनाम्न: परस्य ङित: स्याडागम: स्याद् आपश् च ह्रस्व: ।

सर्वा + ङे = सर्वा + ए = सर्व + स्या + ए = सर्वस्यै ।

सर्वाभ्याम् । सर्वा + भ्यस् = सर्वाभ्य: । सर्वा + ङसि = सर्वा + अस् = सर्व + स्या + अस् = सर्वस्यास् = सर्वस्या: । सर्वाभ्याम् । सर्वाभ्य: । सर्वा + ङस् = सर्वा + अस् = सर्व + स्या + अस् = सर्वस्यास् = सर्वस्या: । सर्वा + ओस् = सर्वे + ओस् = सर्व् + अय् + ओस् = सर्वयोस् = सर्वयो: । सर्वा + आम् = सर्वा + स् + आम् = सर्वासाम् । सर्वा + ङि = सर्वा + आम् = सर्व + स्या + आम् = सर्वस्याम् । सर्वयो: । सर्वा + सुप् = सर्वासु । हे सर्वा + सु = हे सर्वा + स् = हे सर्वे + स् = हे सर्वे । हे सर्वे । हे सर्वा: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **सर्वा** | **सर्वे** | **सर्वा:** | प्रथमा |
| **सर्वाम्** | **सर्वे** | **सर्वा:** | द्वितीया |
| **सर्वया** | **सर्वाभ्याम्** | **सर्वाभि:** | तृतीया |
| **सर्वस्यै** | **सर्वाभ्याम्** | **सर्वाभ्य:** | चतुर्थी |
| **सर्वस्या:** | **सर्वाभ्याम्** | **सर्वाभ्य:** | पञ्चमी |
| **सर्वस्या:** | **सर्वयो:** | **सर्वासाम्** | षष्ठी |
| **सर्वस्याम्** | **सर्वयो:** | **सर्वासु** | सप्तमी |
| **हे सर्वे** | **हे सर्वे** | **हे सर्वा:** | सम्बोधनम् |

एवं विश्वादय आकारान्ता: ।

इत्याकारान्तस्त्रीलिङ्गशब्दा:

---

## अथ इकारान्तस्त्रीलिङ्गशब्दा:

मति: = बुद्धि:

मति + सु = मति + स् = मति: । मति + औ = मती । मति + जस् = मति + अस् = मते + अस् = मत् + अय् + अस् = मतयस् = मतय: । मति + अम् = मतिम् । मति + औट् = मति + औ = मती । मति + शस् = मति + अस् = मतीस् = मती: । मति + टा = मति + आ = मत् + य् + आ = मत्या । मतिभ्याम् । मति + भिस् = मतिभि: ।

## ङिति[७] ह्रस्व[१]श्च[१] १।४।६

इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीकारान्त ऊकारान्तस् तथा इकारान्त उकारान्तश् च स्त्रियां वा नदीसंज्ञौ स्तो ङिति ।

## आण्[१] नद्या:[५] ७।३।११२

नद्यन्तात् परेषां ङिताम् आडागम: ।

मति + ङे = मति + ए = मति + आ + ए = मति + ऐ = मत् + य् + ऐ = मत्यै वा मति + ङे = मति + ए = मते + ए = मत् + अय् + ए = मतये । मतिभ्याम् । मति + भ्यस् = मतिभ्य: । मति + ङसि = मति + अस् = मति + आ + अस् = मति + आस् = मत् + य् + आस् = मत्यास् = मत्या: वा मति + ङसि = मति + अस् = मते + अस् = मतेस् = मते: । मतिभ्याम् । मतिभ्य: । मति + ङस् = मति + अस् = मति + आ + अस् = मति + आस् = मत् + य् + आस् = मत्यास् = मत्या: वा मति

+ ङस् = मति + अस् = मते + अस् = मतेस् = मते: । मति + ओस् = मत् + य् + ओस् = मत्योस् = मत्यो: । मति + आम् = मति + न् + आम् = मति + नाम् = मतीनाम् । मति + ङि = मति + आम् = मति + आ + आम् = मति + आम् = मत् + य् + आम् = मत्याम् वा मति + ङि = मत + औ = मतौ । मत्यो: । मति + सुप् = मति + सु = मतिषु । हे मति + सु = हे मति + स् = हे मते + स् = हे मते । हे मती । हे मतय: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **मति:** | **मती** | **मतय:** | प्रथमा |
| **मतिम्** | **मती** | **मती:** | द्वितीया |
| **मत्या** | **मतिभ्याम्** | **मतिभि:** | तृतीया |
| **मत्यै , मतये** | **मतिभ्याम्** | **मतिभ्य:** | चतुर्थी |
| **मत्या: , मते:** | **मतिभ्याम्** | **मतिभ्य:** | पञ्चमी |
| **मत्या: , मते:** | **मत्यो:** | **मतीनाम्** | षष्ठी |
| **मत्याम् , मतौ** | **मत्यो:** | **मतिषु** | सप्तमी |
| **हे मते** | **हे मती** | **हे मतय:** | सम्बोधनम् |

एवं बुद्ध्यादय: ।

त्रय:

## त्रिचतुरो:[६] स्त्रियां[७] तिसृचतसृ[१] ७।२।९९

## अचि[७] र[१] ऋत:[६] ७।२।१००

तिसृचतसृ एतयोर् ऋकारस्य रेफादेश: स्याद् अचि ।

त्रि + जस् = तिसृ + जस् = तिसृ + अस् = तिस् + र् + अस् = तिस्रस् = तिस्र: । त्रि + शस् = तिसृ + शस् = तिसृ + अस् = तिस् + र् + अस् = तिस्रस् = तिस्र: । त्रि + भिस् = तिसृ + भिस् = तिसृभि: । त्रि + भ्यस् = तिसृ + भ्यस् = तिसृभ्य: । तिसृभ्य: ।

## न[९] तिसृचतसृ[६] ६।४।४

तिसृचतसृ एतयोर् नामि दीर्घो न ।

त्रि + आम् = तिसृ + आम् = तिसृ + न् + आम् = तिसृ + नाम् = तिसृणाम् ।

त्रि + सुप् = त्रि + सु = तिसृ + सु = तिसृषु ।

| बहुवचनानि | विभक्तय: |
|---|---|
| **तिस्र:** | प्रथमा |
| **तिस्र:** | द्वितीया |
| **तिसृभि:** | तृतीया |
| **तिसृभ्य:** | चतुर्थी |
| **तिसृभ्य:** | पञ्चमी |
| **तिसृणाम्** | षष्ठी |
| **तिसृषु** | सप्तमी |
| **हे तिस्र:** | सम्बोधनम् |

इति इकारान्तस्त्रीलिङ्गशब्दा:

## अथ ईकारान्तस्त्रीलिङ्गशब्दाः

### गौरी = पार्वती

गौरी + सु = गौरी + स् = गौरी । गौरी + औ = गौर् + य् + औ = गौर्यौ । गौरी + जस् = गौरी + अस् = गौर् + य् + अस् = गौर्यस् = गौर्यः । गौरी + अम् = गौरीम् । गौरी + औट् = गौरी + औ = गौर् + य् + औ = गौर्यौ । गौरी + शस् = गौरी + अस् = गौरीस् = गौरीः । गौरी + टा = गौरी + आ = गौर् + य् + आ = गौर्या । गौरीभ्याम् । गौरी + भिस् = गौरीभिः ।

### यू[1] स्त्र्याख्यौ[1] नदी[1] १ । ४ । ३

ईकारान्त ऊकारान्तश् च नित्यस्त्रीलिङ्गो नदीसंज्ञो भवति ।
गौरी + ङे = गौरी + ए = गौरी + आ + ए = गौरी + ऐ = गौर् + य् + ऐ = गौर्यै ।
गौरीभ्याम् । गौरी + भ्यस् = गौरीभ्यः । गौरी + ङसि = गौरी + अस् = गौरी + आ + अस् = गौरी + आस् = गौर् + य् + आस् = गौर्यास् = गौर्याः । गौरीभ्याम् । गौरीभ्यः । गौरी + ङस् = गौरी + अस् = गौरी + आ + अस् = गौरी + आस् = गौर् + य् + आस् = गौर्यास् = गौर्याः । गौरी + ओस् = गौर् + य् + ओस् = गौर्योस् = गौर्योः । गौरी + आम् = गौरी + न् + आम् = गौरी + नाम् = गौरीणाम् । गौरी + ङि = गौरी + आम् = गौरी + आ + आम् = गौरी + आम् = गौर् + य् + आम् = गौर्याम् । गौर्योः । गौरी + सुप् = गौरी + सु = गौरीषु ।

### अम्बार्थनद्योर्[6] ह्रस्वः[1] ७ । ३ । १०७

अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बोधनैकवचने परे ।
हे गौरी + सु = हे गौरी + स् = हे गौरि + स् = हे गौरि ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| गौरी | गौर्यौ | गौर्यः | प्रथमा |
| गौरीम् | गौर्यौ | गौरीः | द्वितीया |
| गौर्या | गौरीभ्याम् | गौरीभिः | तृतीया |
| गौर्यै | गौरीभ्याम् | गौरीभ्यः | चतुर्थी |
| गौर्याः | गौरीभ्याम् | गौरीभ्यः | पञ्चमी |
| गौर्याः | गौर्योः | गौरीणाम् | षष्ठी |
| गौर्याम् | गौर्योः | गौरीषु | सप्तमी |
| हे गौरि | हे गौर्यौ | हे गौर्यः | सम्बोधनम् |

एवं नद्यादयः ।

### लक्ष्मीः

लक्ष्मी + सु = लक्ष्मी + स् = लक्ष्मीः ।
अङ्यन्तत्वान् न सुलोपः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| लक्ष्मीः | लक्ष्म्यौ | लक्ष्म्यः | प्रथमा |
| लक्ष्मीम् | लक्ष्म्यौ | लक्ष्मीः | द्वितीया |
| लक्ष्म्या | लक्ष्मीभ्याम् | लक्ष्मीभिः | तृतीया |
| लक्ष्म्यै | लक्ष्मीभ्याम् | लक्ष्मीभ्यः | चतुर्थी |
| लक्ष्म्याः | लक्ष्मीभ्याम् | लक्ष्मीभ्यः | पञ्चमी |
| लक्ष्म्याः | लक्ष्म्योः | लक्ष्मीणाम् | षष्ठी |
| लक्ष्म्याम् | लक्ष्म्योः | लक्ष्मीषु | सप्तमी |
| हे लक्ष्मि | हे लक्ष्म्यौ | हे लक्ष्म्यः | सम्बोधनम् |

स्त्री

स्त्री + सु = स्त्री + स् = स्त्री ।

स्त्रिया:[६] ६ । ४ । ७९

स्त्रीशब्दस्य ईकारस्य स्थान इयङ् स्याद् अजादौ प्रत्यये परे ।
स्त्री + औ = स्त्र् + इयङ् + औ = स्त्र् + इय् + औ = स्त्रियौ । स्त्री + जस् = स्त्री + अस् = स्त्र् + इयङ् + अस् = स्त्र् + इय् + अस् = स्त्रियस् = स्त्रिय: । स्त्री + अम् = स्त्र् + इयङ् + अम् = स्त्र् + इय् + अम् = स्त्रियम् ।

वाऽम्शसो:[७] ६ । ४ । ८०

अमि शसि च स्त्रीशब्दस्य ईकारस्य स्थान इयङ् वा स्यात् ।
स्त्री + अम् = स्त्रीम् ।
स्त्री + औट् = स्त्री + औ = स्त्र् + इयङ् + औ = स्त्र् + इय् + औ = स्त्रियौ ।
स्त्री + शस् = स्त्री + अस् = स्त्र् + इयङ् + अस् = स्त्र् + इय् + अस् = स्त्रियस् = स्त्रिय: वा स्त्री + शस् = स्त्री + अस् = स्त्रीस् = स्त्री: ।
स्त्री + टा = स्त्री + आ = स्त्र् + इयङ् + आ = स्त्र् + इय् + आ = स्त्रिया । स्त्रीभ्याम् । स्त्री + भिस् = स्त्रीभि: । स्त्री + ङे = स्त्री + ए = स्त्र् + इयङ् + ए = स्त्र् + इय् + ए = स्त्रिय् + आ + ए = स्त्रिय् + ऐ = स्त्रियै । स्त्रीभ्याम् । स्त्री + भ्यस् = स्त्रीभ्य: । स्त्री + ङसि = स्त्री + अस् = स्त्र् + इयङ् + अस् = स्त्र् + इय् + अस् = स्त्रिय् + आ + अस् = स्त्रिय् + आस् = स्त्रियास् = स्त्रिया: । स्त्रीभ्याम् । स्त्रीभ्य: । स्त्री + ङस् = स्त्री + अस् = स्त्र् + इयङ् + अस् = स्त्र् + इय् + अस् = स्त्रिय् + आ + अस् = स्त्रिय् + आस् = स्त्रियास् = स्त्रिया: । स्त्री + ओस् = स्त्र् + इयङ् + ओस् = स्त्र् + इय् + ओस् = स्त्रियोस् = स्त्रियो: । स्त्री + आम् = स्त्री + न् + आम् = स्त्री + नाम् = स्त्रीणाम् । स्त्री + ङि = स्त्री + आम् = स्त्र् + इयङ् + आम् = स्त्र् + इय् + आम् = स्त्रिय् + आ + आम् = स्त्रिय् + आम् = स्त्रियाम् । स्त्रियो: । स्त्री + सुप् = स्त्री + सु = स्त्रीषु । हे स्त्री + सु = हे स्त्री + स् = हे स्त्रि + स् = हे स्त्रि । हे स्त्रियौ । हे स्त्रिय: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| स्त्री | स्त्रियौ | स्त्रियः | प्रथमा |
| स्त्रियम् , स्त्रीम् | स्त्रियौ | स्त्रियः, स्त्रीः | द्वितीया |
| स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः | तृतीया |
| स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः | चतुर्थी |
| स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः | पञ्चमी |
| स्त्रियाः | स्त्रियोः | स्त्रीणाम् | षष्ठी |
| स्त्रियाम् | स्त्रियोः | स्त्रीषु | सप्तमी |
| हे स्त्रि | हे स्त्रियौ | हे स्त्रियः | सम्बोधनम् |

श्रीः = लक्ष्मीः

## नेयङुवङ्स्थानावस्त्री १ । ४ । ४

यत्र इयङ् उवङ् भवतस् तत्र ईकारान्त ऊकारान्तश् च नदीसंज्ञौ न भवतः, स्त्रीशब्दस् तु नदीसंज्ञो भवति ।

इति यू स्त्र्याख्यौ नदी १ । ४ । ३ इति सूत्रेण प्राप्ता नदीसंज्ञा निषिध्यतेऽतो ङिति ह्रस्वश्च १ । ४ । ४ इति ङिति विभक्तौ वा नदीसंज्ञा भवति ।

श्री + सु = श्री + स् = श्रीः । श्री + औ = श्र् + इयङ् + औ = श्र् + इय् + औ = श्रियौ । श्री + जस् = श्री + अस् = श्र् + इयङ् + अस् = श्र् + इय् + अस् = श्रियस् = श्रियः । श्री + अम् = श्र् + इयङ् + अम् = श्र् + इय् + अम् = श्रियम् । श्री + औट् = श्री + औ = श्र् + इयङ् + औ = श्र् + इय् + औ = श्रियौ । श्री + शस् = श्री + अस् = श्र् + इयङ् + अस् = श्र् + इय् + अस् = श्रियस् = श्रियः । श्री + टा = श्री + आ = श्र् + इयङ् + आ = श्र् + इय् + आ = श्रिया । श्रीभ्याम् । श्री + भिस् = श्रीभिः । श्री + ङे = श्री + ए = श्र् + इयङ् + ए = श्र् + इय् + ए = श्रिय् + आ + ए = श्रिय् + ऐ = श्रियै वा श्री + ङे = श्री + ए = श्र् + इयङ् + ए = श्र् + इय् + ए = श्रिये । श्रीभ्याम् । श्री + भ्यस् = श्रीभ्यः । श्री + ङसि = श्री + अस् = श्र् + इयङ् + अस् = श्र् + इय् + अस् = श्रिय् + आ + अस् = श्रिय् + आस् = श्रियास् = श्रियाः वा श्री + ङसि = श्री + अस् = श्र् + इयङ् + अस् = श्र् + इय् + अस् = श्रियस् = श्रियः । श्रीभ्याम् । श्रीभ्यः । श्री + ङस् = श्री + अस् = श्र् + इयङ् + अस् = श्र् + इय् + अस् = श्रिय् + आ + अस् = श्रिय् + आस् = श्रियास् = श्रियाः वा श्री + ङस् = श्री + अस् = श्र् + इयङ् + अस् = श्र् + इय् + अस् = श्रियस् = श्रियः । श्री + ओस् = श्र् + इयङ् + ओस् = श्र् + इय् + ओस् = श्रियोस् = श्रियोः ।

## वाऽऽमि १ । ४ । ५

यत्र इयङ् उवङ् भवतस् तत्र ईकारान्त ऊकारान्तश् च वा नदीसंज्ञौ स्त आमि परे, स्त्रीशब्दस् तु नित्यं नदीसंज्ञो भवति ।

श्री + आम् = श्री + न् + आम् = श्री + नाम् = श्रीणाम् वा श्री + आम् = श्र् + इयङ् + आम् = श्र् + इय् + आम् = श्रियाम् ।

श्री + ङि = श्री + आम् = श्र् + इयङ् + आम् = श्र् + इय् + आम् = श्रिय् + आ + आम् = श्रिय् + आम् = श्रियाम् वा श्री + ङि = श्री + इ = श्र् + इयङ् + इ = श्र् + इय् + इ = श्रियि । श्रियोः । श्री + सुप् = श्री + सु = श्रीषु । हे श्रीः । हे श्रियौ । हे श्रियः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| श्रीः | श्रियौ | श्रियः | प्रथमा |
| श्रियम् | श्रियौ | श्रियः | द्वितीया |
| श्रिया | श्रीभ्याम् | श्रीभिः | तृतीया |
| श्रियै, श्रिये | श्रीभ्याम् | श्रीभ्यः | चतुर्थी |
| श्रियाः, श्रियः | श्रीभ्याम् | श्रीभ्यः | पञ्चमी |
| श्रियाः, श्रियः | श्रियोः | श्रीणाम् , श्रियाम् | षष्ठी |
| श्रियाम् , श्रियि | श्रियोः | श्रीषु | सप्तमी |
| हे श्रीः | हे श्रियौ | हे श्रियः | सम्बोधनम् |

इति ईकारान्तस्त्रीलिङ्गशब्दाः

## अथ उकारान्तस्त्रीलिङ्गशब्दाः

### धेनुः = नवप्रसूता गौः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| धेनुः | धेनू | धेनवः | प्रथमा |
| धेनुम् | धेनू | धेनूः | द्वितीया |
| धेन्वा | धेनुभ्याम् | धेनुभिः | तृतीया |
| धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः | चतुर्थी |
| धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः | पञ्चमी |
| धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् | षष्ठी |
| धेन्वाम् , धेनौ | धेन्वोः | धेनुषु | सप्तमी |
| हे धेनो | हे धेनू | हे धेनवः | सम्बोधनम् |

एवं रज्ज्वादयः ।

इति उकारान्तस्त्रीलिङ्गशब्दाः

---

## अथ ऊकारान्तस्त्रीलिङ्गशब्दाः

### वधूः = जाया वा स्नुषा वा स्त्री

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| वधूः | वध्वौ | वध्वः | प्रथमा |
| वधूम् | वध्वौ | वधूः | द्वितीया |
| वध्वा | वधूभ्याम् | वधूभिः | तृतीया |
| वध्वै | वधूभ्याम् | वधूभ्यः | चतुर्थी |
| वध्वाः | वधूभ्याम् | वधूभ्यः | पञ्चमी |
| वध्वाः | वध्वोः | वधूनाम् | षष्ठी |
| वध्वाम् | वध्वोः | वधूषु | सप्तमी |
| हे वधु | हे वध्वौ | हे वध्वः | सम्वोधनम् |

एवं श्वश्र्वादयः ।

### भ्रूः = दृग्भ्याम् ऊर्ध्वभागः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| भ्रूः | भ्रुवौ | भ्रुवः | प्रथमा |
| भ्रुवम् | भ्रुवौ | भ्रुवः | द्वितीया |
| भ्रुवा | भ्रूभ्याम् | भ्रूभिः | तृतीया |
| भ्रुवै, भ्रुवे | भ्रूभ्याम् | भ्रूभ्यः | चतुर्थी |
| भ्रुवाः, भ्रुवः | भ्रूभ्याम् | भ्रूभ्यः | पञ्चमी |
| भ्रुवाः, भ्रुवः | भ्रुवोः | भ्रूणाम् , भ्रुवाम् | षष्ठी |
| भ्रुवाम् , भ्रुवि | भ्रुवोः | भ्रूषु | सप्तमी |
| हे भ्रूः | हे भ्रुवौ | हे भ्रुवः | सम्बोधनम् |

इति ऊकारान्तस्त्रीलिङ्गशब्दाः

---

## अथ ऋकारान्तस्त्रीलिङ्गशब्दाः

### स्वसा = भगिनी

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| स्वसा | स्वसारौ | स्वसारः | प्रथमा |
| स्वसारम् | स्वसारौ | स्वसॄः | द्वितीया |
| स्वस्रा | स्वसृभ्याम् | स्वसृभिः | तृतीया |
| स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः | चतुर्थी |
| स्वसुः | स्वसृभ्याम् | स्वसृभ्यः | पञ्चमी |
| स्वसुः | स्वस्रोः | स्वसॄणाम् | षष्ठी |
| स्वसरि | स्वस्रोः | स्वसृषु | सप्तमी |
| हे स्वसः | हे स्वसारौ | हे स्वसारः | सम्बोधनम् |

### माता

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| माता | मातरौ | मातरः | प्रथमा |
| मातरम् | मातरौ | मातॄः | द्वितीया |
| मात्रा | मातृभ्याम् | मातृभिः | तृतीया |
| मात्रे | मातृभ्याम् | मातृभ्यः | चतुर्थी |
| मातुः | मातृभ्याम् | मातृभ्यः | पञ्चमी |
| मातुः | मात्रोः | मातॄणाम् | षष्ठी |
| मातरि | मात्रोः | मातृषु | सप्तमी |
| हे मातः | हे मातरौ | हे मातरः | सम्बोधनम् |

एवं दुहित्रादयः ।

इति ऋकारान्तस्त्रीलिङ्गशब्दाः

---

## अथ ओकारान्तस्त्रीलिङ्गशब्दः

### द्यौः = आकाशो वा स्वर्गः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| द्यौः | द्यावौ | द्यावः | प्रथमा |
| द्याम् | द्यावौ | द्याः | द्वितीया |
| द्यवा | द्योभ्याम् | द्योभिः | तृतीया |
| द्यवे | द्योभ्याम् | द्योभ्यः | चतुर्थी |
| द्योः | द्योभ्याम् | द्योभ्यः | पञ्चमी |
| द्योः | द्यवोः | द्यवाम् | षष्ठी |
| द्यवि | द्यवोः | द्योषु | सप्तमी |
| हे द्यौः | हे द्यावौ | हे द्यावः | सम्बोधनम् |

इति ओकारान्तस्त्रीलिङ्गशब्दः

---

### अथ औकारान्तस्त्रीलिङ्गशब्दः
नौः = नौका

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **नौः** | **नावौ** | **नावः** | **प्रथमा** |
| **नावम्** | **नावौ** | **नावः** | **द्वितीया** |
| **नावा** | **नौभ्याम्** | **नौभिः** | **तृतीया** |
| **नावे** | **नौभ्याम्** | **नौभ्यः** | **चतुर्थी** |
| **नावः** | **नौभ्याम्** | **नौभ्यः** | **पञ्चमी** |
| **नावः** | **नावोः** | **नावाम्** | **षष्ठी** |
| **नावि** | **नावोः** | **नौषु** | **सप्तमी** |
| **हे नौः** | **हे नावौ** | **हे नावः** | **सम्बोधनम्** |

इति औकारान्तस्त्रीलिङ्गशब्दः

---

### इत्यजन्तस्त्रीलिङ्गप्रकरणम्

❋❋❋

# अथाऽजन्तनपुंसकलिङ्गप्रकरणम्

### अथाऽकारान्तनपुंसकलिङ्गशब्दाः
ज्ञानम्

## अतो[५]ऽम्[१] ७।१।२४

अकारान्तान् नपुंसकात् परयोः स्वमोर् अम् ।

ज्ञान + सु = ज्ञान + अम् = ज्ञानम् ।

## नपुंसका[५]च्च[१] ७।१।१९

नपुंसकात् परस्य औङः शी स्यात् ।

ज्ञान + औ = ज्ञान + शी = ज्ञान + ई = ज्ञाने ।

## जश्शसोः[६] शिः[१] ७।१।२०

नपुंसकात् परयोः जस्-शसोः शिः स्यात् ।

ज्ञान + जस् = ज्ञान + शि

## शि[१] सर्वनामस्थानम्[१] १।१।४२

शि सर्वनामस्थानसंज्ञं स्यात् ।

## नपुंसकस्य[६] झलचः[६] ७।१।७२

झलन्तस्याऽजन्तस्य च नपुंसकस्य नुमागमः स्यात् सर्वनामस्थाने ।

## मिद[1]चो[6]ऽन्त्यात्[5] परः[1] १।१।४७

अचां मध्ये योऽन्त्यस् तस्मात् परस् तस्यैवाऽन्तावयवो मित् स्यात्।
= ज्ञान + इ = ज्ञान + न् + इ = ज्ञाना + न् + इ = ज्ञानानि।
ज्ञान + अम् = ज्ञानम्। ज्ञान + औट् = ज्ञान + औ = ज्ञान + शी = ज्ञान + ई = ज्ञाने। ज्ञान + शस् = ज्ञान + शि = ज्ञान + इ = ज्ञान + न् + इ = ज्ञाना + न् + इ = ज्ञानानि।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **ज्ञानम्** | **ज्ञाने** | **ज्ञानानि** | प्रथमा |
| **ज्ञानम्** | **ज्ञाने** | **ज्ञानानि** | द्वितीया |
| **ज्ञानेन** | **ज्ञानाभ्याम्** | **ज्ञानैः** | तृतीया |
| **ज्ञानाय** | **ज्ञानाभ्याम्** | **ज्ञानेभ्यः** | चतुर्थी |
| **ज्ञानात्, ज्ञानाद्** | **ज्ञानाभ्याम्** | **ज्ञानेभ्यः** | पञ्चमी |
| **ज्ञानस्य** | **ज्ञानयोः** | **ज्ञानानाम्** | षष्ठी |
| **ज्ञाने** | **ज्ञानयोः** | **ज्ञानेषु** | सप्तमी |
| **हे ज्ञान** | **हे ज्ञाने** | **हे ज्ञानानि** | सम्बोधनम् |

एवं धनादयः।

## कतरद्, कतरत्

## अद्ड्[1] डतरादिभ्यः[5] पञ्चभ्यः[5] ७।१।२५

कतर कतम अन्य अन्यतर इतर एभ्यो नपुंसकेभ्यः परयोः स्वमोर् अद्डादेशः स्यात्।

## अचो[6]ऽन्त्यादि[1] टि[1] १।१।६४

अचां मध्ये योऽन्त्योऽच् स आदिर् यस्य तद् टिसंज्ञं स्यात्।

## टेः[6] ६।४।१४३

डिति भस्य टेर् लोपः।
कतर + सु = कतर + अद्ड् = कतर + अद् = कतर् + अद् = कतरद् वा कतरत्। कतर + औ = कतर + शी = कतर + ई = कतरे। कतर + जस् = कतर + शि = कतर + इ = कतर + न् + इ = कतरा + न् + इ = कतरानि = कतराणि। कतर + अम् = कतर + अद्ड् = कतर + अद् = कतर् + अद् = कतरद् वा कतरत्। कतर + औट् = कतर + औ = कतर + शी = कतर + ई = कतरे। कतर + शस् = कतर + शि = कतर + इ = कतर + न् + इ = कतरा + न् + इ = कतरानि = कतराणि।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **कतरद्, कतरत्** | **कतरे** | **कतराणि** | प्रथमा |
| **कतरद्, कतरत्** | **कतरे** | **कतराणि** | द्वितीया |
| **कतरेण** | **कतराभ्याम्** | **कतरैः** | तृतीया |
| **कतरस्मै** | **कतराभ्याम्** | **कतरेभ्यः** | चतुर्थी |
| **कतरस्मात्, कतरस्माद्** | **कतराभ्याम्** | **कतरेभ्यः** | पञ्चमी |
| **कतरस्य** | **कतरयोः** | **कतरेषाम्** | षष्ठी |
| **कतरस्मिन्** | **कतरयोः** | **कतरेषु** | सप्तमी |
| **हे कतरद्, हे कतरत्** | **हे कतरे** | **हे कतराणि** | सम्बोधनम् |

एवं कतमद् अन्यद् अन्यतरद् इतरद्।

श्रीपम् = लक्ष्म्या रक्षकम्

## ह्रस्वो[१] नपुंसके[७] प्रातिपदिकस्य[६] १ । २ । ४७

नपुंसकेऽजन्तस्य प्रातिपदिकस्य ह्रस्व: ।
श्रीपा = श्रीप ।
श्रीप + सु = श्रीप + अम् = श्रीपम् । श्रीप + औ = श्रीप + शी = श्रीप + ई = श्रीपे । श्रीप + जस् = श्रीप + शि = श्रीप + इ = श्रीप + न् + इ = श्रीपा + न् + इ = श्रीपानि = श्रीपाणि । श्रीप + अम् = श्रीपम् । श्रीप + औट् = श्रीप + औ = श्रीप + शी = श्रीप + ई = श्रीपे । श्रीप + शस् = श्रीप + शि = श्रीप + इ = श्रीप + न् + इ = श्रीपा + न् + इ = श्रीपानि = श्रीपाणि ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **श्रीपम्** | **श्रीपे** | **श्रीपाणि** | प्रथमा |
| **श्रीपम्** | **श्रीपे** | **श्रीपाणि** | द्वितीया |
| **श्रीपेण** | **श्रीपाभ्याम्** | **श्रीपै:** | तृतीया |
| **श्रीपाय** | **श्रीपाभ्याम्** | **श्रीपेभ्य:** | चतुर्थी |
| **श्रीपात् , श्रीपाद्** | **श्रीपाभ्याम्** | **श्रीपेभ्य:** | पञ्चमी |
| **श्रीपस्य** | **श्रीपयो:** | **श्रीपाणाम्** | षष्ठी |
| **श्रीपे** | **श्रीपयो:** | **श्रीपेषु** | सप्तमी |
| **हे श्रीप** | **हे श्रीपे** | **हे श्रीपाणि** | सम्बोधनम् |

नपुंसके दीर्घान्तं प्रातिपदिकं न भवति ।
आ = अ । ई = इ । ऊ = उ । ॠ = ऋ । ए = इ । ऐ = इ । ओ = उ । औ = उ ।

इत्यकारान्तनपुंसकलिङ्गशब्दा:

---

## अथ इकारान्तनपुंसकलिङ्गशब्दा:

वारि = जलम्

## स्वमोर्[६] नपुंसकात्[५] ७ । १ । २३

नपुंसकात् परयो: स्वमोर् लुक् स्यात् ।
वारि + सु = वारि ।

## इको[६]ऽचि[७] विभक्तौ[७] ७ । १ । ७३

इगन्तस्य नपुंसकस्य नुमागमोऽचि विभक्तौ ।
वारि + औ = वारि + शी = वारि + ई = वारि + न् + ई = वारिनी = वारिणी । वारि + जस् = वारि + शि = वारि + इ = वारि + न् + इ = वारी + न् + इ = वारीनि = वारीणि ।
वारि + अम् = वारि । वारि + औट् = वारि + औ = वारि + शी = वारि + ई = वारि + न् + ई = वारिनी = वारिणी । वारि + शस् = वारि + शि = वारि + इ = वारि + न् + इ = वारी + न् + इ

= वारीनि = वारीणि । वारि + टा = वारि + आ = वारि + न् + आ = वारिना = वारिणा । वारिभ्याम् । वारि + भिस् = वारिभिः । वारि + ङे = वारि + ए = वारि + न् + ए = वारिने = वारिणे । वारिभ्याम् । वारि + भ्यस् = वारिभ्यः । वारि + ङसि = वारि + अस् = वारि + न् + अस् = वारिनस् = वारिनः = वारिणः । वारिभ्याम् । वारिभ्यः । वारि + ङस् = वारि + अस् = वारि + न् + अस् = वारिनस् = वारिनः = वारिणः । वारि + ओस् = वारि + न् + ओस् = वारिनोस् = वारिनोः = वारिणोः । वारि + आम् = वारि + न् + आम् = वारि + नाम् = वारीनाम् = वारीणाम् । वारि + ङि = वारि + इ = वारि + न् + इ = वारिनि = वारिणि । वारिणोः । वारि + सुप् = वारि + सु = वारिषु । हे वारे वा हे वारि । हे वारिणी । हे वारीणि ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **वारि** | **वारिणी** | **वारीणि** | प्रथमा |
| **वारि** | **वारिणी** | **वारीणि** | द्वितीया |
| **वारिणा** | **वारिभ्याम्** | **वारिभिः** | तृतीया |
| **वारिणे** | **वारिभ्याम्** | **वारिभ्यः** | चतुर्थी |
| **वारिणः** | **वारिभ्याम्** | **वारिभ्यः** | पञ्चमी |
| **वारिणः** | **वारिणोः** | **वारीणाम्** | षष्ठी |
| **वारिणि** | **वारिणोः** | **वारिषु** | सप्तमी |
| **हे वारे, हे वारि** | **हे वारिणी** | **हे वारीणि** | सम्बोधनम् |

## दधि

दधि + सु = दधि । दधि + औ = दधि + शी = दधि + ई = दधि + न् + ई = दधिनी । दधि + जस् = दधि + शि = दधि + इ = दधि + न् + इ = दधी + न् + इ = दधीनि । दधि + अम् = दधि । दधि + औट् = दधि + शी = दधि + ई = दधि + न् + ई = दधिनी । दधि + शस् = दधि + शि = दधि + इ = दधि + न् + इ = दधी + न् + इ = दधीनि ।

## अस्थिदधिसक्थ्यक्ष्णाम[६]नङ्[१]दात्तः[१] ७ । १ । ७५

अस्थि दधि सक्थि अक्षि एषाम् इकारस्य स्थानेऽनङ् स्याद् टादावचि ।

दधि + टा = दधि + आ = दध् + अनङ् + आ = दध् + अन् + आ

## अल्लोपो[१]ऽनः[६] ६ । ४ । १३४

अन् इत्येवमन्तस्य भस्याऽकारलोपः ।

= दध् + न् + आ = दध्ना ।

दधिभ्याम् । दधि + भिस् = दधिभिः । दधि + ङे = दधि + ए = दध् + अनङ् + ए = दध् + अन् + ए = दध् + न् + ए = दध्ने । दधिभ्याम् । दधि + भ्यस् = दधिभ्यः । दधि + ङसि = दधि + अस् = दध् + अनङ् + अस् = दध् + अन् + अस् = दध् + न् + अस् = दध्नस् = दध्नः । दधिभ्याम् । दधिभ्यः । दधि + ङस् = दधि + अस् = दध् + अनङ् + अस् = दध् + अन् + अस् = दध् + न् + अस् = दध्नस् = दध्नः । दधि + ओस् = दध् + अनङ् + ओस् = दध् + अन् + ओस् = दध् + न् + ओस् = दध्नोस् = दध्नोः । दधि + आम् = दधि + न् + आम् = दध् + न् + आम् = दध्नाम् ।

## विभाषा[1] ङिश्योः[7] ६ । ४ । १३६

अन् इत्येवमन्तस्य भस्याऽकारलोपो वा स्यात् ङिश्योः परयोः ।
दधि + ङि = दधि + इ = दध् + अनङ् + इ = दध् + अन् + इ = दध् + न् + इ = दध्नि वा दधि + ङि = दधि + इ = दध् + अनङ् + इ = दध् + अन् + इ = दधनि । दध्नोः । दधि + सुप् = दधि + सु = दधिषु । हे दधे वा हे दधि । हे दधिनी । हे दधीनि ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **दधि** | **दधिनी** | **दधीनि** | **प्रथमा** |
| **दधि** | **दधिनी** | **दधीनि** | **द्वितीया** |
| **दध्ना** | **दधिभ्याम्** | **दधिभिः** | **तृतीया** |
| **दध्ने** | **दधिभ्याम्** | **दधिभ्यः** | **चतुर्थी** |
| **दध्नः** | **दधिभ्याम्** | **दधिभ्यः** | **पञ्चमी** |
| **दध्नः** | **दध्नोः** | **दध्नाम्** | **षष्ठी** |
| **दध्नि , दधनि** | **दध्नोः** | **दधिषु** | **सप्तमी** |
| **हे दधे , हे दधि** | **हे दधिनी** | **हे दधीनि** | **सम्बोधनम्** |

**एवम् अस्थि सक्थि अक्षि ।**

इति इकारान्तनपुंसकलिङ्गशब्दाः

---

### अथ उकारान्तनपुंसकलिङ्गशब्दाः

**मधु = क्षौद्रम्**

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **मधु** | **मधुनी** | **मधूनि** | **प्रथमा** |
| **मधु** | **मधुनी** | **मधूनि** | **द्वितीया** |
| **मधुना** | **मधुभ्याम्** | **मधुभिः** | **तृतीया** |
| **मधुने** | **मधुभ्याम्** | **मधुभ्यः** | **चतुर्थी** |
| **मधुनः** | **मधुभ्याम्** | **मधुभ्यः** | **पञ्चमी** |
| **मधुनः** | **मधुनोः** | **मधूनाम्** | **षष्ठी** |
| **मधुनि** | **मधुनोः** | **मधुषु** | **सप्तमी** |
| **हे मधो, हे मधु** | **हे मधुनी** | **हे मधूनि** | **सम्बोधनम्** |

एवं जत्वादयः ।

इति उकारान्तनपुंसकलिङ्गशब्दाः

---

### अथ भाषितपुंस्काः शब्दाः

## तृतीयादिषु[7] भाषितपुंस्कं[1] पुंवद्[2] गालवस्य[6] ७ । १ । ७४

प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कम् इगन्तं नपुंसकं पुंवद् वा टादावचि ।

## शुचि = पवित्रम्

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
| --- | --- | --- | --- |
| शुचि | शुचिनी | शुचीनि | प्रथमा |
| शुचि | शुचिनी | शुचीनि | द्वितीया |
| शुचिना | शुचिभ्याम् | शुचिभि: | तृतीया |
| शुचिने, शुचये | शुचिभ्याम् | शुचिभ्य: | चतुर्थी |
| शुचिन:, शुचे: | शुचिभ्याम् | शुचिभ्य: | पञ्चमी |
| शुचिन:, शुचे: | शुचिनो:, शुच्यो: | शुचीनाम् | षष्ठी |
| शुचिनि, शुचौ | शुचिनो:, शुच्यो: | शुचिषु | सप्तमी |
| हे शुचे, हे शुचि | हे शुचिनी | हे शुचीनि | सम्बोधनम् |

## साधु

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
| --- | --- | --- | --- |
| साधु | साधुनी | साधूनि | प्रथमा |
| साधु | साधुनी | साधूनि | द्वितीया |
| साधुना | साधुभ्याम् | साधुभि: | तृतीया |
| साधुने , साधवे | साधुभ्याम् | साधुभ्य: | चतुर्थी |
| साधुन: , साधो: | साधुभ्याम् | साधुभ्य: | पञ्चमी |
| साधुन: , साधो: | साधुनो: , साध्वो: | साधूनाम् | षष्ठी |
| साधुनि , साध्वौ | साधुनो: , साध्वो: | साधुषु | सप्तमी |
| हे साधो , हे साधु | हे साधुनी | हे साधूनि | सम्बोधनम् |

## धातृ = पालकम्

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
| --- | --- | --- | --- |
| धातृ | धातृणी | धातृणि | प्रथमा |
| धातृ | धातृणी | धातृणि | द्वितीया |
| धातृणा , धात्रा | धातृभ्याम् | धातृभि: | तृतीया |
| धातृणे , धात्रे | धातृभ्याम् | धातृभ्य: | चतुर्थी |
| धातृण: , धातु: | धातृभ्याम् | धातृभ्य: | पञ्चमी |
| धातृण: , धातु: | धातृणो:, धात्रो: | धातृणाम् | षष्ठी |
| धातृणि , धातरि | धातृणो:, धात्रो: | धातृषु | सप्तमी |
| हे धात:, हे धातृ | हे धातृणी | हे धातृणि | सम्बोधनम् |

एवं दात्रादय: ।

यन्निमित्तमुपादाय पुंसि शब्द: प्रवर्तते ।
क्लीबवृत्तौ तदेव स्यादुक्तपुंस्कं तदुच्यते ॥
पीलुर्वृक्ष: फलं पीलु पीलुने न तु पीलवे ।
वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुन: ॥
इति भाषितपुंस्का: शब्दा:

---

### इत्यजन्तनपुंसकलिङ्गप्रकरणम्

# अथ हलन्तपुंलिङ्गप्रकरणम्

पयोमुक् , पयोमुग् = मेघः

पयोमुच् + सु = पयोमुच् + स् = पयोमुच्

चोः[६] कुः[१] ८ । २ । ३०

चवर्गस्य कवर्गः स्याज् झलि पदान्ते च ।

= पयोमुक् वा पयोमुग् ।

पयोमुच् + औ = पयोमुचौ । पयोमुच् + जस् = पयोमुच् + अस् = पयोमुचस् = पयोमुचः । पयोमुच् + अम् = पयोमुचम् । पयोमुच् + औट् = पयोमुच् + औ = पयोमुचौ । पयोमुच् + शस् = पयोमुच् + अस् = पयोमुचस् = पयोमुचः । पयोमुच् + टा = पयोमुच् + आ = पयोमुचा ।
पयोमुच् + भ्याम्

स्वादिष्व[७]सर्वनामस्थाने[७] १ । ४ । १७

स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात् ।
यादिष्वजादिषु च परेषु न ।

= पयोमुक् + भ्याम् = पयोमुग्भ्याम् । पयोमुच् + भिस् = पयोमुक् + भिस् = पयोमुग् + भिस् = पयोमुग्भिः ।

पयोमुच् + ङे = पयोमुच् + ए = पयोमुचे । पयोमुग्भ्याम् । पयोमुच् + भ्यस् = पयोमुक् + भ्यस् = पयोमुग् + भ्यस् = पयोमुग्भ्यः । पयोमुच् + ङसि = पयोमुच् + अस् = पयोमुचस् = पयोमुचः । पयोमुग्भ्याम् । पयोमुग्भ्यः । पयोमुच् + ङस् = पयोमुच् + अस् = पयोमुचस् = पयोमुचः । पयोमुच् + ओस् = पयोमुचोस् = पयोमुचोः । पयोमुच् + आम् = पयोमुचाम् । पयोमुच् + ङि = पयोमुच् + इ = पयोमुचि । पयोमुचोः । पयोमुच् + सु = पयोमुक् + सु = पयोमुक् + षु = पयोमुक्षु । हे पयोमुक् वा हे पयोमुग् । हे पयोमुचौ । हे पयोमुचः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| पयोमुक् , पयोमुग् | पयोमुचौ | पयोमुचः | प्रथमा |
| पयोमुचम् | पयोमुचौ | पयोमुचः | द्वितीया |
| पयोमुचा | पयोमुग्भ्याम् | पयोमुग्भिः | तृतीया |
| पयोमुचे | पयोमुग्भ्याम् | पयोमुग्भ्यः | चतुर्थी |
| पयोमुचः | पयोमुग्भ्याम् | पयोमुग्भ्यः | पञ्चमी |
| पयोमुचः | पयोमुचोः | पयोमुचाम् | षष्ठी |
| पयोमुचि | पयोमुचोः | पयोमुक्षु | सप्तमी |
| हे पयोमुक् , हे पयोमुग् | हे पयोमुचौ | हे पयोमुचः | सम्बोधनम् |

सुहृद् , सुहृत् = मित्रम्

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **सुहृद् , सुहृत्** | **सुहृदौ** | **सुहृद:** | प्रथमा |
| **सुहृदम्** | **सुहृदौ** | **सुहृद:** | द्वितीया |
| **सुहृदा** | **सुहृद्भ्याम्** | **सुहृद्भि:** | तृतीया |
| **सुहृदे** | **सुहृद्भ्याम्** | **सुहृद्भ्य:** | चतुर्थी |
| **सुहृद:** | **सुहृद्भ्याम्** | **सुहृद्भ्य:** | पञ्चमी |
| **सुहृद:** | **सुहृदो:** | **सुहृदाम्** | षष्ठी |
| **सुहृदि** | **सुहृदो:** | **सुहृत्सु** | सप्तमी |
| **हे सुहृद् , हे सुहृत्** | **हे सुहृदौ** | **हे सुहृद:** | सम्बोधनम् |

भूभृत् , भूभृद् = पर्वतो वा राजा

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **भूभृत् , भूभृद्** | **भूभृतौ** | **भूभृत:** | प्रथमा |
| **भूभृतम्** | **भूभृतौ** | **भूभृत:** | द्वितीया |
| **भूभृता** | **भूभृद्भ्याम्** | **भूभृद्भि:** | तृतीया |
| **भूभृते** | **भूभृद्भ्याम्** | **भूभृद्भ्य:** | चतुर्थी |
| **भूभृत:** | **भूभृद्भ्याम्** | **भूभृद्भ्य:** | पञ्चमी |
| **भूभृत:** | **भूभृतो:** | **भूभृताम्** | षष्ठी |
| **भूभृति** | **भूभृतो:** | **भूभृत्सु** | सप्तमी |
| **हे भूभृत् , हे भूभृद्** | **हे भूभृतौ** | **हे भूभृत:** | सम्बोधनम् |

क:

## किम:[६] क:[१] ७ । २ । १०३

किम: क: स्याद् विभक्तौ ।

किम् + सु = क + सु = क + स् = क: । किम् + औ = क + औ = कौ । किम् + जस् = क + जस् = क + शी = क + ई = के । किम् + अम् = क + अम् = कम् । किम् + औट् = क + औट् = क + औ = कौ । किम् + शस् = क + शस् = क + अस् = कास् = कान् । किम् + टा = क + टा = क + इन = केन । किम् + भ्याम् = क + भ्याम् = काभ्याम् । किम् + भिस् = क + भिस् = क + ऐस् = कैस् = कै: । किम् + ङे = क + ङे = कस्मै । काभ्याम् । किम् + भ्यस् = क + भ्यस् = केभ्यस् = केभ्य: । किम् + ङसि = क + ङसि = कस्मात् । काभ्याम् । केभ्य: । किम् + ङस् = क + ङस् = कस्य । किम् + ओस् = क + ओस् = के + ओस् = क् + अय् + ओस् = कयोस् = कयो: । किम् + आम् = क + आम् = क + स् + आम् = के + स् + आम् = के + साम् = केषाम् । किम् + ङि = क + ङि = कस्मिन् । कयो: । किम् + सुप् = क + सु = के + सु = केषु ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **क:** | **कौ** | **के** | प्रथमा |
| **कम्** | **कौ** | **कान्** | द्वितीया |
| **केन** | **काभ्याम्** | **कै:** | तृतीया |
| **कस्मै** | **काभ्याम्** | **केभ्य:** | चतुर्थी |
| **कस्मात्, कस्माद्** | **काभ्याम्** | **केभ्य:** | पञ्चमी |
| **कस्य** | **कयो:** | **केषाम्** | षष्ठी |
| **कस्मिन्** | **कयो:** | **केषु** | सप्तमी |

त्यद् तद् यद् एतद् इदम् अदस् युष्मद् अस्मद् किम् एषां शब्दानां सम्बोधनं न भवति ।

अयम्

### इदमो[6] म:[1] ७ । २ । १०८

इदमोऽन्त्ये म: स्यात् सौ परे ।

त्यदाद्यत्वापवाद: ।

इदम् + सु = इदम् + स्

### इदो[6]ऽय्[1] पुंसि[7] ७ । २ । १११

इदम इदोऽय् स्यात् सौ परे पुंसि ।

= अय् + अम् + स् = अयम् + स् = अयम् ।

इदम् + औ = इद + अ + औ

### अतो[5] गुणे[7] ६ । १ । ९७

अपदान्ताद् अकाराद् गुणे पररूपम् एकादेश: स्यात् ।

= इद + औ

### द[1]श्च[1] ७ । २ । १०९

इदमो दस्य म: स्याद् विभक्तौ ।

= इम + औ = इमौ । इदम् + जस् = इद + अ + जस् = इद + जस् = इम + जस् = इम + शी = इम + ई = इमे । इदम् + अम् = इद + अ + अम् = इद + अम् = इम + अम् = इमम् । इदम् + औट् = इदम् + औ = इद + अ + औ = इद + औ = इम + औ = इमौ । इदम् + शस् = इद + अ + शस् = इद + शस् = इम + शस् = इम + अस् = इमास् = इमान् ।

### अना[1]प्य[7]क:[6] ७ । २ । ११२

इदम इदोऽन् आपि विभक्तौ ।

इदम् + टा = इद + अ + टा = इद + टा = इद + इन = अन् + अ + इन = अन + इन = अनेन ।

### हलि[7] लोप:[1] ७ । २ । ११३

इदम इदो लोप आपि हलादौ विभक्तौ ।

इदम् + भ्याम् = इद + अ + भ्याम् = इद + भ्याम् = अ + भ्याम् = आभ्याम् ।

## ने॑दमदसोर॑कोः॑ ७।१।११

इदमदसोर् भिस ऐस् न ।
इदम् + भिस् = इद + अ + भिस् = इद + भिस् = अ + भिस् = ए + भिस् = एभिः ।
इदम् + ङे = इद + अ + ङे = इद + ङे = इद + स्मै = अस्मै । आभ्याम् । इदम् + भ्यस् = इद + अ + भ्यस् = इद + भ्यस् = अ + भ्यस् = ए + भ्यस् = एभ्यः । इदम् + ङसि = इद + अ + ङसि = इद + ङसि = इद + स्मात् = अस्मात् वा अस्माद् । आभ्याम् । एभ्यः । इदम् + ङस् = इद + अ + ङस् = इद + ङस् = इद + स्य = अस्य । इदम् + ओस् = इद + अ + ओस् = इद + ओस् = अन् + अ + ओस् = अन् + ए + ओस् = अन् + अय् + ओस् = अनयोस् = अनयोः । इदम् + आम् = इद + अ + आम् = इद + आम् = इद + स् + आम् = इद + साम् = अ + साम् = ए + साम् = एषाम् । इदम् + ङि = इद + अ + ङि = इद + ङि = इद + स्मिन् = अस्मिन् । अनयोः । इदम् + सुप् = इदम् + सु = इद + अ + सु = इद + सु = अ + सु = ए + सु = एषु ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| अयम् | इमौ | इमे | प्रथमा |
| इमम् | इमौ | इमान् | द्वितीया |
| अनेन | आभ्याम् | एभिः | तृतीया |
| अस्मै | आभ्याम् | एभ्यः | चतुर्थी |
| अस्मात् , अस्माद् | आभ्याम् | एभ्यः | पञ्चमी |
| अस्य | अनयोः | एषाम् | षष्ठी |
| अस्मिन् | अनयोः | एषु | सप्तमी |

### राजा

राजन् + सु = राजन् + स् = राजान् + स् = राजान् = राजा । राजन् + औ = राजान् + औ = राजानौ । राजन् + जस् = राजन् + अस् = राजान् + अस् = राजानस् = राजानः । राजन् + अम् = राजान् + अम् = राजानम् । राजन् + औट् = राजन् + औ = राजान् + औ = राजानौ । राजन् + शस् = राजन् + अस् = राज् + न् + अस् = राज् + ञ् + अस् = राज्ञ् + अस् = राज्ञस् = राज्ञः । राजन् + टा = राजन् + आ = राज् + न् + आ = राज् + ञ् + आ = राज्ञ् + आ = राज्ञा । राजन् + भ्याम् = राजभ्याम् । राजन् + भिस् = राज + भिस् = राजभिः । राजन् + ङे = राजन् + ए = राज् + न् + ए = राज् + ञ् + ए = राज्ञ् + ए = राज्ञे । राजभ्याम् । राजन् + भ्यस् = राज + भ्यस् = राजभ्यः । राजन् + ङसि = राजन् + अस् = राज् + न् + अस् = राज् + ञ् + अस् = राज्ञ् + अस् = राज्ञस् = राज्ञः । राजभ्याम् । राजभ्यः । राजन् + ङस् = राजन् + अस् = राज् + न् + अस् = राज् + ञ् + अस् = राज्ञ् + अस् = राज्ञस् = राज्ञः । राजन् + ओस् = राज् + न् + ओस् = राज् + ञ् + ओस् = राज्ञ् + ओस् = राज्ञोस् = राज्ञोः । राजन् + आम् = राज् + न् + आम् = राज् + ञ् + आम् = राज्ञ् + आम् = राज्ञाम् । राजन् + ङि = राजन् + इ = राज् + न् + इ = राज् + ञ् + इ = राज्ञ् + इ = राज्ञि वा राजन् + इ = राजनि । राज्ञोः । राजन् + सुप् = राजन् + सु = राजसु ।

## न॑ ङिसम्बुद्ध्योः॑ ८।२।८

सम्बोधनैकवचने परे नस्य लोपो न भवति ।
हे राजन् + सु = हे राजन् + स् = हे राजन् ।
हे राजानौ । हे राजानः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| राजा | राजानौ | राजानः | प्रथमा |
| राजानम् | राजानौ | राज्ञः | द्वितीया |
| राज्ञा | राजभ्याम् | राजभिः | तृतीया |
| राज्ञे | राजभ्याम् | राजभ्यः | चतुर्थी |
| राज्ञः | राजभ्याम् | राजभ्यः | पञ्चमी |
| राज्ञः | राज्ञोः | राज्ञाम् | षष्ठी |
| राज्ञि, राजनि | राज्ञोः | राजसु | सप्तमी |
| हे राजन् | हे राजानौ | हे राजानः | सम्बोधनम् |

यज्वा = यज्ञकर्ता

यज्वन् + सु = यज्वन् + स् = यज्वान् + स् = यज्वान् = यज्वा । यज्वन् + औ = यज्वान् + औ = यज्वानौ । यज्वन् + जस् = यज्वन् + अस् = यज्वान् + अस् = यज्वानस् = यज्वानः । यज्वन् + अम् = यज्वान् + अम् = यज्वानम् । यज्वन् + औट् = यज्वन् + औ = यज्वान् + औ = यज्वानौ ।

## न[६] संयोगाद्[५] वमन्तात्[५] ६ । ४ । १३७

वमन्तसंयोगाद् अनोऽकारस्य लोपो न ।

यज्वन् + शस् = यज्वन् + अस् = यज्वनस् = यज्वनः । यज्वन् + टा = यज्वन् + आ = यज्वना । यज्वन् + भ्याम् = यज्वभ्याम् । यज्वन् + भिस् = यज्व + भिस् = यज्वभिः । यज्वन् + ङे = यज्वन् + ए = यज्वने । यज्वभ्याम् । यज्वन् + भ्यस् = यज्वभ्यस् = यज्वभ्यः । यज्वन् + ङसि = यज्वन् + अस् = यज्वनस् = यज्वनः । यज्वभ्याम् । यज्वभ्यः । यज्वन् + ङस् = यज्वन् + अस् = यज्वनस् = यज्वनः । यज्वन् + ओस् = यज्वनोस् = यज्वनोः । यज्वन् + आम् = यज्वनाम् । यज्वन् + ङि = यज्वन् + इ = यज्वनि । यज्वनोः । यज्वन् + सुप् = यज्वन् + सु = यज्वसु । हे यज्वन् + सु = हे यज्वन् + स् = हे यज्वन् । हे यज्वानौ । हे यज्वानः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| यज्वा | यज्वानौ | यज्वानः | प्रथमा |
| यज्वानम् | यज्वानौ | यज्वनः | द्वितीया |
| यज्वना | यज्वभ्याम् | यज्वभिः | तृतीया |
| यज्वने | यज्वभ्याम् | यज्वभ्यः | चतुर्थी |
| यज्वनः | यज्वभ्याम् | यज्वभ्यः | पञ्चमी |
| यज्वनः | यज्वनोः | यज्वनाम् | षष्ठी |
| यज्वनि | यज्वनोः | यज्वसु | सप्तमी |
| हे यज्वन् | हे यज्वानौ | हे यज्वानः | सम्बोधनम् |

ब्रह्मा

ब्रह्मन् + सु = ब्रह्मन् + स् = ब्रह्मान् + स् = ब्रह्मान् = ब्रह्मा । ब्रह्मन् + औ = ब्रह्मान् + औ = ब्रह्मानौ = ब्रह्माणौ । ब्रह्मन् + जस् = ब्रह्मन् + अस् = ब्रह्मान् + अस् = ब्रह्मानस् = ब्रह्मानः

= ब्रह्माण: । ब्रह्मन् + अम् = ब्रह्मान् + अम् = ब्रह्मानम् = ब्रह्माणम् । ब्रह्मन् + औट् = ब्रह्मन् + औ = ब्रह्मान् + औ = ब्रह्मानौ = ब्रह्माणौ । ब्रह्मन् + शस् = ब्रह्मन् + अस् = ब्रह्मनस् = ब्रह्मन: = ब्रह्मण: । ब्रह्मन् + टा = ब्रह्मन् + आ = ब्रह्मना = ब्रह्मणा । ब्रह्मन् + भ्याम् = ब्रह्मभ्याम् । ब्रह्मन् + भिस् = ब्रह्मभिस् = ब्रह्मभि: । ब्रह्मन् + ङे = ब्रह्मन् + ए = ब्रह्मने = ब्रह्मणे । ब्रह्मभ्याम् । ब्रह्मन् + भ्यस् = ब्रह्मभ्यस् = ब्रह्मभ्य: । ब्रह्मन् + ङसि = ब्रह्मन् + अस् = ब्रह्मनस् = ब्रह्मन: = ब्रह्मण: । ब्रह्मभ्याम् । ब्रह्मभ्य: । ब्रह्मन् + ङस् = ब्रह्मन् + अस् = ब्रह्मनस् = ब्रह्मन: = ब्रह्मण: । ब्रह्मन् + ओस् = ब्रह्मनोस् = ब्रह्मनो: = ब्रह्मणो: । ब्रह्मन् + आम् = ब्रह्मनाम् = ब्रह्मणाम् । ब्रह्मन् + ङि = ब्रह्मन् + इ = ब्रह्मनि = ब्रह्मणि । ब्रह्मणो: । ब्रह्मन् + सुप् = ब्रह्मन् + सु = ब्रह्मसु । हे ब्रह्मन् + सु = हे ब्रह्मन् + स् = हे ब्रह्मन् । हे ब्रह्माणौ । हे ब्रह्माण: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **ब्रह्मा** | **ब्रह्माणौ** | **ब्रह्माण:** | प्रथमा |
| **ब्रह्माणम्** | **ब्रह्माणौ** | **ब्रह्मण:** | द्वितीया |
| **ब्रह्मणा** | **ब्रह्मभ्याम्** | **ब्रह्मभि:** | तृतीया |
| **ब्रह्मणे** | **ब्रह्मभ्याम्** | **ब्रह्मभ्य:** | चतुर्थी |
| **ब्रह्मण:** | **ब्रह्मभ्याम्** | **ब्रह्मभ्य:** | पञ्चमी |
| **ब्रह्मण:** | **ब्रह्मणो:** | **ब्रह्मणाम्** | षष्ठी |
| **ब्रह्मणि** | **ब्रह्मणो:** | **ब्रह्मसु** | सप्तमी |
| **हे ब्रह्मन्** | **हे ब्रह्माणौ** | **हे ब्रह्माण:** | सम्बोधनम् |

### वृत्रहा = इन्द्र:

### सौ॑ च॑ ६ । ४ । १३

इनन्त हनन्त पूषन् अर्यमन् एषां शब्दानां सौ पर एवोपधाया दीर्घ: स्यान् नाऽन्यत्र, सम्बोधने दीर्घो न ।

वृत्रहन् + सु = वृत्रहन् + स् = वृत्रहान् + स् = वृत्रहान् = वृत्रहा ।

वृत्रहन् + औ = वृत्रहनौ = वृत्रहणौ । वृत्रहन् + जस् = वृत्रहन् + अस् = वृत्रहनस् = वृत्रहन: = वृत्रहण: । वृत्रहन् + अम् = वृत्रहनम् = वृत्रहणम् । वृत्रहन् + औट् = वृत्रहन् + औ = वृत्रहनौ = वृत्रहणौ ।

### हो॑ हन्तेर्ञ्णि॑न्नेषु॑ ७ । ३ । ५४

ञिति णिति प्रत्यये नकारे च परे हन्तेर् हकारस्य कुत्वम् ।

वृत्रहन् + शस् = वृत्रहन् + अस् = वृत्र + ह् + न् + अस् = वृत्र + घ् + न् + अस् = वृत्रघ्नस् = वृत्रघ्न: । वृत्रहन् + टा = वृत्रहन् + आ = वृत्र + ह् + न् + आ = वृत्र + घ् + न् + आ = वृत्रघ्ना । वृत्रहन् + भ्याम् = वृत्रहभ्याम् । वृत्रहन् + भिस् = वृत्रह + भिस् = वृत्रहभि: । वृत्रहन् + ङे = वृत्रहन् + ए = वृत्र + ह् + न् + ए = वृत्र + घ् + न् + ए = वृत्रघ्ने । वृत्रहभ्याम् । वृत्रहन् + भ्यस् = वृत्रह +

भ्यस् = वृत्रहभ्य: । वृत्रहन् + ङसि = वृत्रहन् + अस् = वृत्र + ह् + न् + अस् = वृत्र + घ् + न् + अस् = वृत्रघ्नस् = वृत्रघ्न: । वृत्रहभ्याम् । वृत्रहभ्य: । वृत्रहन् + ङस् = वृत्रहन् + अस् = वृत्र + ह् + न् + अस् = वृत्र + घ् + न् + अस् = वृत्रघ्नस् = वृत्रघ्न: । वृत्रहन् + ओस् = वृत्र + ह् + न् + ओस् = वृत्र + घ् + न् + ओस् = वृत्रघ्नोस् = वृत्रघ्नो: । वृत्रहन् + आम् = वृत्र + ह् + न् + आम् = वृत्र + घ् + न् + आम् = वृत्रघ्नाम् । वृत्रहन् + ङि = वृत्रहन् + इ = वृत्र + ह् + न् + इ = वृत्र + घ् + न् + इ = वृत्रघ्नि वा वृत्रहन् + ङि = वृत्रहन् + इ = वृत्रहनि = वृत्रहणि । वृत्रघ्नो: । वृत्रहन् + सुप् = वृत्रहन् + सु = वृत्रहसु । हे वृत्रहन् + सु = हे वृत्रहन् + स् = हे वृत्रहन् । हे वृत्रहणौ । हे वृत्रहण: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **वृत्रहा** | **वृत्रहणौ** | **वृत्रहण:** | प्रथमा |
| **वृत्रहणम्** | **वृत्रहणौ** | **वृत्रघ्न:** | द्वितीया |
| **वृत्रघ्ना** | **वृत्रहभ्याम्** | **वृत्रहभि:** | तृतीया |
| **वृत्रघ्ने** | **वृत्रहभ्याम्** | **वृत्रहभ्य:** | चतुर्थी |
| **वृत्रघ्न:** | **वृत्रहभ्याम्** | **वृत्रहभ्य:** | पञ्चमी |
| **वृत्रघ्न:** | **वृत्रघ्नो:** | **वृत्रघ्नाम्** | षष्ठी |
| **वृत्रघ्नि, वृत्रहणि** | **वृत्रघ्नो:** | **वृत्रहसु** | सप्तमी |
| **हे वृत्रहन्** | **हे वृत्रहणौ** | **हे वृत्रहण:** | सम्बोधनम् |

पूषा = सूर्य:

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **पूषा** | **पूषणौ** | **पूषण:** | प्रथमा |
| **पूषणम्** | **पूषणौ** | **पूष्ण:** | द्वितीया |
| **पूष्णा** | **पूषभ्याम्** | **पूषभि:** | तृतीया |
| **पूष्णे** | **पूषभ्याम्** | **पूषभ्य:** | चतुर्थी |
| **पूष्ण:** | **पूषभ्याम्** | **पूषभ्य:** | पञ्चमी |
| **पूष्ण:** | **पूष्णो:** | **पूष्णाम्** | षष्ठी |
| **पूष्णि, पूषणि** | **पूष्णो:** | **पूषसु** | सप्तमी |
| **हे पूषन्** | **हे पूषणौ** | **हे पूषण:** | सम्बोधनम् |

अर्यमा = सूर्य:

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **अर्यमा** | **अर्यमणौ** | **अर्यमण:** | प्रथमा |
| **अर्यमणम्** | **अर्यमणौ** | **अर्यम्ण:** | द्वितीया |
| **अर्यम्णा** | **अर्यमभ्याम्** | **अर्यमभि:** | तृतीया |
| **अर्यम्णे** | **अर्यमभ्याम्** | **अर्यमभ्य:** | चतुर्थी |
| **अर्यम्ण:** | **अर्यमभ्याम्** | **अर्यमभ्य:** | पञ्चमी |
| **अर्यम्ण:** | **अर्यम्णो:** | **अर्यम्णाम्** | षष्ठी |
| **अर्यम्णि, अर्यमणि** | **अर्यम्णो:** | **अर्यमसु** | सप्तमी |
| **हे अर्यमन्** | **हे अर्यमणौ** | **हे अर्यमण:** | सम्बोधनम् |

### शार्ङ्गी = विष्णुः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **शार्ङ्गी** | **शार्ङ्गिणौ** | **शार्ङ्गिणः** | प्रथमा |
| **शार्ङ्गिणम्** | **शार्ङ्गिणौ** | **शार्ङ्गिणः** | द्वितीया |
| **शार्ङ्गिणा** | **शार्ङ्गिभ्याम्** | **शार्ङ्गिभिः** | तृतीया |
| **शार्ङ्गिणे** | **शार्ङ्गिभ्याम्** | **शार्ङ्गिभ्यः** | चतुर्थी |
| **शार्ङ्गिणः** | **शार्ङ्गिभ्याम्** | **शार्ङ्गिभ्यः** | पञ्चमी |
| **शार्ङ्गिणः** | **शार्ङ्गिणोः** | **शार्ङ्गिणाम्** | षष्ठी |
| **शार्ङ्गिणि** | **शार्ङ्गिणोः** | **शार्ङ्गिषु** | सप्तमी |
| **हे शार्ङ्गिन्** | **हे शार्ङ्गिणौ** | **हे शार्ङ्गिणः** | सम्बोधनम् |

### यशस्वी

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| **यशस्वी** | **यशस्विनौ** | **यशस्विनः** | प्रथमा |
| **यशस्विनम्** | **यशस्विनौ** | **यशस्विनः** | द्वितीया |
| **यशस्विना** | **यशस्विभ्याम्** | **यशस्विभिः** | तृतीया |
| **यशस्विने** | **यशस्विभ्याम्** | **यशस्विभ्यः** | चतुर्थी |
| **यशस्विनः** | **यशस्विभ्याम्** | **यशस्विभ्यः** | पञ्चमी |
| **यशस्विनः** | **यशस्विनोः** | **यशस्विनाम्** | षष्ठी |
| **यशस्विनि** | **यशस्विनोः** | **यशस्विषु** | सप्तमी |
| **हे यशस्विन्** | **हे यशस्विनौ** | **हे यशस्विनः** | सम्बोधनम् |

### मघवान् , मघवा = इन्द्रः

## मघवा[१] बहुलम्[१] ६ । ४ । १२८

मघवन्शब्दस्याऽन्ते तृ इत्यादेशो वा स्यात् ।

ऋ इत्संज्ञो भवति ।

मघवन् = मघवतृ = मघवत्

## उगिदचां[६] सर्वनामस्थाने[७]ऽधातोः[६] ७ । १ । ७०

अधातोर् उगितोऽञ्चतेश् च नुमागमः स्यात् सर्वनामस्थाने परे ।

मघवत् + सु = मघवत् + स् = मघव + न् + त् + स् = मघव + न् + त् = मघवन् = मघवान् वा मघवन् + सु = मघवन् + स् = मघवान् + स् = मघवान् = मघवा । मघवत् + औ = मघव + न् + त् + औ = मघवन्तौ वा मघवन् + औ = मघवान् + औ = मघवानौ । मघवत् + जस् = मघवत् + अस् = मघव + न् + त् + अस् = मघवन्तस् = मघवन्तः वा मघवन् + जस् = मघवन् + अस् = मघवान् + अस् = मघवानस् = मघवानः । मघवत् + अम् = मघव + न् + त् + अम् = मघवन्तम् वा मघवन् + अम् = मघवान् + अम् = मघवानम् । मघवत् + औट् = मघवत् + औ = मघव + न् + त् + औ = मघवन्तौ वा मघवन् + औट् = मघवान् + औ = मघवानौ ।

मघवत् + शस् = मघवत् + अस् = मघवतस् = मघवतः ।

## श्वयुवमघोनाम[६]तद्धिते[७] ६ । ४ । १३३

श्वन् युवन् मघवन् इत्येतेषां भानाम् अतद्धिते प्रत्यये परे सम्प्रसारणं स्यात् ।

## इग्[१] यण:[६] सम्प्रसारणम्[१] १ । १ । ४५

यण: स्थाने प्रयुज्यमान इक् सम्प्रसारणसंज्ञ: स्यात् ।

## सम्प्रसारणा[५]च्च[१] ६ । १ । १०८

सम्प्रसारणाद् अचि पूर्वरूपम् एकादेश: स्यात् ।

मघवन् + शस् = मघवन् + अस् = मघ + उ + अन् + अस् = मघ + उन् + अस् = मघोन् + अस् = मघोनस् = मघोन: ।

मघवत् + टा = मघवत् + आ = मघवता वा मघवन् + टा = मघवन् + आ = मघ + उ + अन् + आ = मघ + उन् + आ = मघोन् + आ = मघोना । मघवत् + भ्याम् = मघवद्भ्याम् वा मघवन् + भ्याम् = मघवभ्याम् । मघवत् + भिस् = मघवद् + भिस् = मघवद्भि: वा मघवन् + भिस् = मघव + भिस् = मघवभि: । मघवत् + ङे = मघवत् + ए = मघवते वा मघवन् + ङे = मघवन् + ए = मघ + उ + अन् + ए = मघ + उन् + ए = मघोन् + ए = मघोने । मघवद्भ्याम् वा मघवभ्याम् । मघवत् + भ्यस् = मघवद् + भ्यस् = मघवद्भ्य: वा मघवन् + भ्यस् = मघव + भ्यस् = मघवभ्य: । मघवत् + ङसि = मघवत् + अस् = मघवतस् = मघवत: वा मघवन् + ङसि = मघवन् + अस् = मघ + उ + अन् + अस् = मघ + उन् + अस् = मघोन् + अस् = मघोनस् = मघोन: । मघवद्भ्याम् वा मघवभ्याम् । मघवद्भ्य: वा मघवभ्य: । मघवत् + ङस् = मघवत् + अस् = मघवतस् = मघवत: वा मघवन् + ङस् = मघवन् + अस् = मघ + उ + अन् + अस् = मघ + उन् + अस् = मघोन् + अस् = मघोनस् = मघोन: । मघवत् + ओस् = मघवतोस् = मघवतो: वा मघवन् + ओस् = मघ + उ + अन् + ओस् = मघ + उन् + ओस् = मघोन् + ओस् = मघोनोस् = मघोनो: । मघवत् + आम् = मघवताम् वा मघवन् + आम् = मघ + उ + अन् + आम् = मघ + उन् + आम् = मघोन् + आम् = मघोनाम् । मघवत् + ङि = मघवत् + इ = मघवति वा मघवन् + ङि = मघवन् + इ = मघ + उ + अन् + इ = मघ + उन् + इ = मघोन् + इ = मघोनि । मघवतो: वा मघोनो: । मघवत् + सुप् = मघवत्सु वा मघवन् + सुप् = मघवन् + सु = मघवसु । हे मघवत् + सु = हे मघवत् + स् = हे मघव + न् + त् + स् = हे मघव + न् + त् = हे मघवन् वा हे मघवन् + सु = हे मघवन् + स् = हे मघवन् । हे मघवन्तौ वा हे मघवानौ । हे मघवन्त: वा हे मघवान: ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| **मघवान् , मघवा** | **मघवन्तौ, मघवानौ** | **मघवन्त:, मघवान:** | प्रथमा |
| **मघवन्तम् , मघवानम्** | **मघवन्तौ, मघवानौ** | **मघवत:, मघोन:** | द्वितीया |
| **मघवता, मघोना** | **मघवद्भ्याम् , मघवभ्याम्** | **मघवद्भि:, मघवभि:** | तृतीया |
| **मघवते, मघोने** | **मघवद्भ्याम् , मघवभ्याम्** | **मघवद्भ्य:, मघवभ्य:** | चतुर्थी |
| **मघवत:, मघोन:** | **मघवद्भ्याम् , मघवभ्याम्** | **मघवद्भ्य:, मघवभ्य:** | पञ्चमी |
| **मघवत:, मघोन:** | **मघवतो:, मघोनो:** | **मघवताम् , मघोनाम्** | षष्ठी |
| **मघवति, मघोनि** | **मघवतो:, मघोनो:** | **मघवत्सु , मघवसु** | सप्तमी |
| **हे मघवन्** | **हे मघवन्तौ, हे मघवानौ** | **हे मघवन्त:, हे मघवान:** | सम्बोधनम् |

श्वा = कुक्कुर:

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| श्वा | श्वानौ | श्वानः | प्रथमा |
| श्वानम् | श्वानौ | शुनः | द्वितीया |
| शुना | श्वभ्याम् | श्वभिः | तृतीया |
| शुने | श्वभ्याम् | श्वभ्यः | चतुर्थी |
| शुनः | श्वभ्याम् | श्वभ्यः | पञ्चमी |
| शुनः | शुनोः | शुनाम् | षष्ठी |
| शुनि | शुनोः | श्वसु | सप्तमी |
| हे श्वन् | हे श्वानौ | हे श्वानः | सम्बोधनम् |

युवा = तरुण:

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तय: |
|---|---|---|---|
| युवा | युवानौ | युवानः | प्रथमा |
| युवानम् | युवानौ | यूनः | द्वितीया |
| यूना | युवभ्याम् | युवभिः | तृतीया |
| यूने | युवभ्याम् | युवभ्यः | चतुर्थी |
| यूनः | युवभ्याम् | युवभ्यः | पञ्चमी |
| यूनः | यूनोः | यूनाम् | षष्ठी |
| यूनि | यूनोः | युवसु | सप्तमी |
| हे युवन् | हे युवानौ | हे युवानः | सम्बोधनम् |

पन्था: = मार्ग:

पथिमथ्यृभुक्षामात् ७।१।८५

पथिन् मथिन् ऋभुक्षिन् इत्येतेषाम् आकारोऽन्तादेश: स्यात् सौ परे ।

इतोऽत् सर्वनामस्थाने ७।१।८६

पथिन् मथिन् ऋभुक्षिन् इत्येतेषाम् इकारस्याऽकार: स्यात् सर्वनामस्थाने परे ।

थो न्थ: ७।१।८७

पथिमथोस् थस्य न्थादेश: सर्वनामस्थाने परे ।

पथिन् + सु = पथिन् + स् = पथि + आ + स् = पथ् + अ + आ + स् = पन्थ् + अ + आ + स् = पन्थ् + आ + स् = पन्था + स् = पन्था: । पथिन् + औ = पथ् + अन् + औ = पन्थ् + अन् + औ = पन्थान् + औ = पन्थानौ । पथिन् + जस् = पथिन् + अस् = पथ् + अन् + अस् = पन्थ् + अन् + अस् = पन्थान् + अस् = पन्थानस् = पन्थान: । पथिन् + अम् = पथ् + अन् + अम् = पन्थ् + अन् + अम् = पन्थान् + अम् = पन्थानम् । पथिन् + औट् = पथिन् + औ = पथ् + अन् + औ = पन्थ् + अन् + औ = पन्थान् + औ = पन्थानौ ।

पथिन् + शस् = पथिन् + अस्

## भस्य[1] टेर्[1]लोपः[1] ७।१।८८

भानां पथिन् मथिन् ऋभुक्षिन् इत्येतेषां टेर् लोपः ।

= पथ् + अस् = पथस् = पथः । पथिन् + टा = पथिन् + आ = पथ् + आ = पथा ।

पथिन् + भ्याम् = पथिभ्याम् । पथिन् + भिस् = पथिभिस् = पथिभिः । पथिन् + ङे = पथिन् + ए = पथ् + ए = पथे । पथिभ्याम् । पथिन् + भ्यस् = पथिभ्यस् = पथिभ्यः । पथिन् + ङसि = पथिन् + अस् = पथ् + अस् = पथस् = पथः । पथिभ्याम् । पथिभ्यः । पथिन् + ङस् = पथिन् + अस् = पथ् + अस् = पथस् = पथः । पथिन् + ओस् = पथ् + ओस् = पथोस् = पथोः । पथिन् + आम् = पथ् + आम् = पथाम् । पथिन् + ङि = पथिन् + इ = पथ् + इ = पथि । पथोः । पथिन् + सुप् = पथि + सु = पथिषु । हे पन्थाः । हे पन्थानौ । हे पन्थानः ।

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| पन्थाः | पन्थानौ | पन्थानः | प्रथमा |
| पन्थानम् | पन्थानौ | पथः | द्वितीया |
| पथा | पथिभ्याम् | पथिभिः | तृतीया |
| पथे | पथिभ्याम् | पथिभ्यः | चतुर्थी |
| पथः | पथिभ्याम् | पथिभ्यः | पञ्चमी |
| पथः | पथोः | पथाम् | षष्ठी |
| पथि | पथोः | पथिषु | सप्तमी |
| हे पन्थाः | हे पन्थानौ | हे पन्थानः | सम्बोधनम् |

### मन्थाः = मन्थदण्डः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| मन्थाः | मन्थानौ | मन्थानः | प्रथमा |
| मन्थानम् | मन्थानौ | मथः | द्वितीया |
| मथा | मथिभ्याम् | मथिभिः | तृतीया |
| मथे | मथिभ्याम् | मथिभ्यः | चतुर्थी |
| मथः | मथिभ्याम् | मथिभ्यः | पञ्चमी |
| मथः | मथोः | मथाम् | षष्ठी |
| मथि | मथोः | मथिषु | सप्तमी |
| हे मन्थाः | हे मन्थानौ | हे मन्थानः | सम्बोधनम् |

ऋभुक्षाः = इन्द्रः

| एकवचनानि | द्विवचनानि | बहुवचनानि | विभक्तयः |
|---|---|---|---|
| ऋभुक्षाः | ऋभुक्षाणौ | ऋभुक्षाणः | प्रथमा |
| ऋभुक्षाणम् | ऋभुक्षाणौ | ऋभुक्षः | द्वितीया |
| ऋभुक्षा | ऋभुक्षिभ्याम् | ऋभुक्षिभिः | तृतीया |
| ऋभुक्षे | ऋभुक्षिभ्याम् | ऋभुक्षिभ्यः | चतुर्थी |
| ऋभुक्षः | ऋभुक्षिभ्याम् | ऋभुक्षिभ्यः | पञ्चमी |
| ऋभुक्षः | ऋभुक्षोः | ऋभुक्षाम् | षष्ठी |
| ऋभुक्षि | ऋभुक्षोः | ऋभुक्षिषु | सप्तमी |
| हे ऋभुक्षाः | हे ऋभुक्षाणौ | हे ऋभुक्षाणः | सम्बोधनम् |

पञ्च

पञ्चन्शब्दो नित्यं बहुवचनान्तः ।

## ष्णान्ता[१] षट्[१] १।१।२४

षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यात् ।

पञ्चन् + जस् = पञ्चन् = पञ्च । पञ्चन् + शस् = पञ्चन् = पञ्च । पञ्चन् + भिस् = पञ्चभिस् = पञ्चभिः । पञ्चन् + भ्यस् = पञ्च + भ्यस् = पञ्चभ्यस् = पञ्चभ्यः । पञ्चभ्यः ।

## षट्चतुर्भ्य[५]श्च[१] ७।१।५५

षट्संज्ञकशब्देभ्यश् चतुर्शब्दाच् च परस्याऽमो नुडागमः ।

